॥रा०॥ ॥१॥ श्रीहरिर्विजयतेतराम्॥श्रीमतेरामानुजायनमः॥वकुलाभरणायनमः॥श्रीगुरवेनमः॥रामौनम
यस्यद्विरदवक्त्राद्याःपारिषद्याःपरःशतं॥विघ्नंनिघ्नंतिभजतांविष्वक्सेनंतमाश्रये॥१॥हारितं अंबरीष
स्तुगत्वाहारीतस्याश्रमंनृपः॥ववंदेतंमहात्मानंबालार्कसदृशप्रभं॥सएवकुशलस्तेनपूजितःपर
मासने॥२॥उपविष्टस्ततोविप्रमुवाचनृपनंदनः॥भगवान्सर्वधर्मज्ञसर्ववेदविदांवरः॥३॥पृच्छामित्वां
महाभागपरमंधर्ममव्ययं॥कथंवर्णाश्रमाणांतुनित्यनैमित्तिकीक्रिया॥४॥कर्त्तव्यंमुनिशार्दूलनारीणां
चानरस्यच॥स्वरूपंजीवपरयोःकथंमोक्षपदस्यच॥५॥तत्प्राप्तिसाधनंब्रह्मन्वक्तुमर्हसिसुव्रत
एवमुक्तस्सविप्रर्षिस्तेनराजर्षिणातदा॥उवाचपरमप्रीत्याप्रनमस्कृत्यजनार्दनं॥६॥हारीतउ
वाच॥शृणुराजन्प्रवक्ष्यामिसर्ववेदोपबृंहितं॥यदुक्तंब्रह्मणापूर्वंपृच्छतोममभूतल॥तद्व
वीमिपरंधर्मंशृणुष्वैकाग्रमानसः॥७॥सर्वेषामेवदेवानामनादिपुरुषोत्तमः॥ईश्वरस्त्वसर्
वास्यजगतोप्रभुरव्ययः॥८॥नारायणोवासुदेवोविष्णुर्ब्रह्माच्युतोहरिः॥स्रष्टाधाताविधाताचसर्
वपरमेश्वरः॥हिरण्यगर्भःसवितागुणभृन्निर्गुणोव्ययः॥परमात्मापरंब्रह्मपरंज्योतिःपरात्प
रः॥इंद्रःप्रजापतिस्सूर्यःशिवोवह्निःसनातनः॥सर्वात्मकःसर्वमुदृत्सर्वभूतभावनः॥य
मश्चभगवान्कृष्णोमुकुंदोनंतएवच॥यज्ञोयज्ञपतिर्यज्वाब्रह्मण्योब्रह्मणस्पतिः॥१०॥स
एवपुंडरीकाक्षःश्रीभूलीलाधिपोमहान्॥सहस्रमूर्द्धाविश्वात्मासहस्रकरपादवा ॥राम०॥ ॥१॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

हा॰स्मृ॰ ॥२॥ तद्विधानं ममाचक्ष्व विस्तरेण वसुव्रत ॥ हारीत उवाच ॥ शृणु राजन् प्रवक्ष्यामि निर्मितां वै
ष्णवीः क्रियाः ॥ यदुक्तं ब्रह्मणा पूर्वं वसिष्ठायेश्च वैष्णवैः ॥ संस्काराणां तु सर्वेषां आद्यं चक्रादि
धारणं ॥ तत्कर्तव्यं हि सर्वेषां विधिना वै द्विजन्मना ॥ आचार्यं संश्रयेत्पूर्वं मनोज्ञं वैष्णवं द्विजं
शुद्धसत्वगुणोपेतं नवेजपाकर्मकारकं ॥ संसंप्रदायसंयुक्तं मंत्ररत्नार्थकोविदं ॥ ज्ञानवैराग्यसं
पन्नं वेदवेदांगपारगं ॥ शासितारं सदाचारैः सर्वधर्मविदांवरं ॥ महाभागवतं विप्रं सदाचारनि
षेविणं ॥ आलोक्य सर्वशास्त्राणि पुराणानि च वैष्णवः ॥ तदर्थमाचरेद्यस्तु स आचार्य इतीरितः ॥ आस्ति
2 कं मननसंसिद्धिरूपेतं धर्मवत्सलं ॥ श्रद्धधानं सदाचारे गुरुशुश्रूषणतत्परं ॥ संवत्सरं परीक्ष्याथलशि
ष्यं शासयेद्गुरुः ॥ तस्याथ पंचसंस्कारान् कुर्यात्सम्यक् विधानतः ॥ प्रातः स्नात्वा शुचौ देशे पूजयि
त्वा जनार्दनं ॥ स्नातं शिष्यं समानीय तेनैव सह देशिकः ॥ स्थाप्य पश्चान्नलेर्गव्यैः चक्रादीन् चैव यद्
वा ॥ पुष्पैर्धूपैश्च दीपैश्च नैवेद्यैर्विविधैरपि ॥ तत्तत्प्रकाशकैर्मंत्रैः रर्चयेत्पुरतो हरेः ॥ स्वगृह्योक्त
मथ कुर्वीत इध्माधानादि पूर्वकं ॥ पौरुषेण तु सूक्तेन पायसं घृतमिश्रितं ॥ आज्येन मूलमंत्रेण
हुत्वा चाष्टोत्तरं शतं ॥ वैष्णव्या चैव गायत्र्या जुहुयात्प्रयतो गुरुः ॥ पश्चादग्नौ विनिक्षिप्य चक्राद्या
युधपंचकं ॥ पूजयित्वा सहस्रारं ध्यात्वा तद्वह्निमंडले ॥ षडक्षरेण जुहुयात् ॥ आज्यं विंशति सं
ख्यया ॥ सवैष्णवेति मंत्रेणाष्टकेनाज्याहुतिक्रमात् ॥ ततः प्रदक्षिणं कृत्वा सशिष्यो वह्निमात्म ॥राम॰॥ ॥२॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

न् ॥ यज्ज्ञात्वा न निवर्त्तन्ते तद्धाम परमं हरेः ॥ चतुर्भिः शोभनोपायैः साध्योयं समहात्मभिः ॥ तुरियपरद्
योर्भक्त्यासुसिद्धः समुदाहृतः ॥ तस्वीकुर्वन्ति विद्वांसः स्वस्वरूपतया सदा ॥ नैःसर्गिकं हि सर्वेषां दास्य
मेव हरेः सदा ॥ स्वाम्यं परस्वरूपस्य दास्यं जीवस्य सर्वदा ॥ प्राकृतप्यगात्मनो रूपं स्वाम्यदास्यमिति स्थितिः
॥ दास्यमेव परं धर्मं दास्यमेव परं हितं ॥ दास्येनैव भवेन्मुक्तिरन्यथा निरयं व्रजेत् ॥ विष्णोर्दास्यं परा भक्ति
येषां तु न भवेत्क्वचित् ॥ तेषामेव हि संसृष्टं निरयं ब्रह्मणा नृप ॥ नारायणस्य दासाये न भवंति नराधमाः
॥ जीवंत एव चांडाला भविष्यंति न संशयः ॥ तस्माद्दास्यं परा भक्तिमालंब्य नृपसत्तम ॥ नित्यं नैमित्यकं
त्री सर्वं कुर्यात्प्रीतये हरेः सदा ॥ तस्य स्वरूपं रूपं च गुणांश्चापि विभूतयः ॥ ज्ञात्वा परमचेष्टां च कुर्याद्यावज्जीव
मतंद्रितः ॥ तमेव मनसा ध्यायेद्वाचा संकीर्त्तयेत्प्रभुं ॥ जपेद्धि जुहुयाद्गत्वा तद्दास्यैकविचक्षणः ॥ शं
खचक्रोर्द्ध्वपुंड्रादिधारणं दास्यलक्षणं ॥ तन्नामकरणं चैव वैष्णवं तदिहोच्यते ॥ अवैष्णवास्तु ये विप्राः
पाषंडास्ते नराधमाः ॥ तेषां तु नरके वासः कल्पकोटिशतैरपि ॥ तापाद्दिपंचसंस्कारी मंत्ररत्नार्थतत्व
वित् ॥ वैष्णवः स जगत्पूज्यो याति विष्णोः परं पदं ॥ अचक्रधारी यो विप्रो बहुवेदकृतोपि वा ॥ स जीवन्ने
व चांडालो मृतो निरयमाप्नुयात् ॥ तस्मात्तापादिसंस्काराः कर्त्तव्या धर्मकांक्षिणा ॥ अयमेव परो धर्मः प्र
धानः सर्वकर्मणां ॥ इति श्रीहारीतस्मृतौ वैष्णवधर्मशास्त्रे पंचसंस्कारप्रतिपादनं नाम प्रथमोऽध्यायः ॥ १ ॥ अं
बरीष उवाच ॥ भगवान्वैष्णवाः पंचसंस्कारान्सर्वकर्मणां ॥ प्रधानमिति यत्प्रोक्तं सर्वैरपि महर्षिभिः ॥ १

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

या ॥ तस्माद्वै [illegible] तप्तचक्रस्य चांकनं मुनिभिः स्मृतं ॥ पवित्रं विततं ब्राह्मं प्रभो गात्रेषु धारितं ॥ श्रुत्यैव चांक
ये गात्रे तद्ब्रह्मसमाश्रये ॥ यत्ते पवित्रमर्चिष्याग्ने विततमंतरा ॥ पुनीहि तेनैव महामहं तन्नो श्रुतिरह
हितं ॥ पवित्रमिति चैवाग्निरग्निर्वै चक्रमुच्यते ॥ अग्निरेव सहस्रारं सहस्रारं नेमिरुच्यते ॥ नेमिना तप्त
तनुर्यैर्विप्रेणैः समतां व्रजेत् ॥ यत्ते पवित्रमर्चिष्यग्निना तेन पुनीहि नः ॥ दक्षिणे तु भुजे विप्रो बिभृयाद्
वै सुदर्शनं ॥ सव्ये तु शंखं बिभृयादिति वेदविदो विदुः ॥ इत्यादिश्रुतिभिः प्रोक्तं विप्राणां चक्रस्य धारणं
पुराणेष्वितिहासेषु सात्विकेषु स्मृतिष्वपि ॥ शंखचक्रोर्ध्वपुंड्रादिरहितं ब्राह्मणं नृप ॥ यः श्राद्धे भोजयेद्वि
प्रः पितॄणां तस्य दुर्गतिः ॥ शंखचक्रोर्ध्वपुंड्राद्यैश्चिह्नैः प्रियतमैर्हरेः ॥ रहितः सर्वधर्मेभ्यः च्युतो नरकमाप्नु
यात् ॥ रुद्रार्चने त्रिपुंड्रस्य धारणं यत्र दृश्यते ॥ तच्छूद्राणां विधिः प्रोक्तो न द्विजानां कदाचन ॥ प्रतिलोमानां लोमानु ४८
दुर्गागणपभैरवाः ॥ पूजनीया यथार्हेण बिल्वचंदनधारिणां ॥ यक्षराक्षसभूतानि विद्याधरगणास्तथा
3 चांडालानामर्चनीया मद्यमांसनिषेविनां ॥ स्ववर्णविहितं धर्ममेवं ज्ञात्वा समाचरेत् ॥ रुद्रार्चनाद्ब्राह्मणस्य
शूद्रेण समतां व्रजेत् ॥ भैक्षभूतार्चनात्सद्यश्चांडालत्वमवाप्नुयात् ॥ न भस्म धारयेद्विप्रः परमापद्गतो
पि वा ॥ मोहाद्वै बिभृयाद्भस्म सुरापो भवेद्ध्रुवं ॥ तिर्यक्पुंड्रधरं विप्रं दाकारधरं तथा ॥ श्वपाकमिव नेक्षे
त नरं नाभिभाषेत् कुत्रचित् ॥ तस्माद्द्विजातिभिर्धार्यमूर्ध्वपुंड्रं विधानतः ॥ मृदा शुभ्रेण सततं सान्तरालं मनोहरं
स्नात्वा शुभ्रे द्विपूर्वाह्ने विष्णुमभ्यर्च्य देशिकः ॥ स्नातं शिष्यं समाहूय होमं कुर्वीत पूर्ववत् ॥ सहोमांत्रे तिसृ ॥ राम ॥
क्तेन पायसं मधुमिश्रितं ॥ हुत्वा मूलमंत्रेण शतमष्टोत्तरं घृतं ॥ स्थंडिले तु ततः पश्चात्तंड्यानि यथाक्र ॥३॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

वान्॥ नमस्कृत्वा ततो विष्णुं जुहुयान्मंत्रवरं शुभं॥ प्राङ्मुखं तु समासीनं शिष्यं मे कार्यचेतसः॥ प्रतप्तेनैव चक्रेण
रवादिदेहेतिभिर्मंत्रमुच्चरन्॥ दक्षिणे तु भुजे चक्रं वामांसे शंखमेव च॥ गदां च भाले मध्ये तु हृदये नंदकं
तथा॥ मस्तके तु तथा शार्ङ्गं स्वकीये विमलं तथा॥ पश्चात्प्रक्षाल्य तोयेन पुनः पूजां समाचरेत्॥ होमशेषं स
माप्याथ वैष्णवान्भोजयेत्ततः॥ एवं तापक्रिया कार्या वैष्णवी कलुषापहा प्रधानं वैष्णवं तेषां तापसंस्का
रमुत्तमं॥ तापसंस्कारमात्रेण परां सिद्धिमवाप्नुयात्॥ केचित्तु चक्रशंखौ द्वौ प्रतप्तौ बाहुमूलयोः॥ धारयं
ति महात्मानः चक्रमेकं तु चापरे॥ वैष्णवानां तु हेतीनां प्रधानं चक्रमुच्यते॥ तेनैव बाहुमूले तु प्रतप्तेन।
नांकयेद्बुधः॥ जाते पुत्रे पिता स्नात्वा होमं कुर्याद्विधानतः॥ तेनाग्निनैव संतप्तचक्रेण भुजमूलयोः॥ अं
कयित्वा शिशोः पश्चान्नाम कुर्याच्च वैष्णवं॥ पश्चात्सर्वाणि कर्माणि कुर्वीत स्वविधानतः॥ अंकयित्वा तु च
क्रेण यत्किंचित्कर्म संचरेत्॥ तत्सर्वं याति वैफल्यमिष्टापूर्तादिकं नृप॥ धारयेन्मंत्रदीक्षायां चक्राद्याः पंच हे
तयः॥ चक्रं वै कर्मसिद्ध्यर्थं जातकर्मणि धारयेत्॥ अचक्रधारी विप्रस्तु सर्वकर्मसु गर्हितः॥ अवैष्णवत्व
मापन्नो नरकं चाधिगच्छति॥ चक्रादिचिह्नरहितं प्रकृतं कलुषान्वितं॥ अवैष्णवं तु तद्दूरात् श्वपाकमि
व संत्यजेत्॥ अवैष्णवस्तु यो विप्रः श्वपाकादधमः स्मृतः॥ अ[illegible]श्नाद्वै योग्यपंक्तौ यो रौरवं नरकं व्रजेत्॥ अ
वैष्णवस्तु यो विप्रः सर्वधर्मयुतोऽपि वा॥ स पाषंडोऽपि विज्ञेयः सर्वकर्मसु नार्हति॥ तस्माच्चक्रं विधानेन
तप्तं वै धारयेद्द्विजः॥ सर्वाश्रमेषु वसतां स्त्रीणां च श्रुतिचोदनात्॥ अनायुधांकितो यस्तु राष्ट्रे देवाऽति
वैष्णुतिः॥ चक्रेणांकां च वै चक्रं विष्टलिप्य चानुनिनिः स्मृतं दीरितं॥ अवैष्णवकं नमित्युक्तं चायं निष्णवर्णंत

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

॥ हा॰ स्मृ॰ ॥ ४ ॥ कल्पकोटिसहस्राणि रौरवं नरकं व्रजेत् ॥ तस्माच्छिद्रान्वितं पुंड्रं धारयेद्विष्णुपदाकृति ॥ ललाटा
द्विष्णुचास्यैषु सर्वकर्मसु वैष्णवः ॥ नासिकामूलमारभ्य ललाटान्तं तु विन्यसेत् ॥ द्व्यंगुलं त्र्यंगुलं चापि
मध्ये छिद्रं प्रकल्पयेत् ॥ पार्श्वे द्व्यंगुलिमात्रं तु विन्यसेद् द्विजसत्तमः ॥ पुंड्राणामन्तराले षु हरिद्रां धारये
च्छुभं ॥ ललाटपृष्ठयोः कंठे भुजयोरंसयोरपि चतुरंगुलमात्रं तु विन्यसेदायतं द्विजः ॥ उरस्यष्टांगुलं धा
र्यं भुजयोरायतं तथा ॥ उदरे पार्श्वयोर्नित्यमायतं तु दशांगुलं ॥ केशवादीन्नमोन्तेन प्रणवाद्याननुक्रमात्
ललाटे केशवं रूपं कुक्षौ नारायणं न्यसेत् ॥ वक्षःस्थले माधवं च गोविंदं कंठदेशतः ॥ विष्णुं च दक्षिणे पार्श्वे
बाहौ च मधुसूदनं ॥ त्रिविक्रमं तथैवांसे वामनं वामपार्श्वतः ॥ श्रीधरं वामबाहौ तु हृषीकेशं तथांसके ॥
पृष्ठे च पद्मनाभं तु ग्रीवे दामोदरं तथा ॥ तत्प्रक्षालनतोयेन वासुदेवेति मूर्द्धनि ॥ केशवस्तु सुवर्णाभः शं
4 खचक्रगदाधरः ॥ शुक्लांबरधरः सौम्यो मुक्ताभरणभूषितः ॥ नारायणो घनश्यामः शंखपद्मगदासिमान् ॥ पि
~~[illegible]~~ पीतवासा मणिमयैर्भूषणैरुपशोभितः ॥ माधवश्चोत्पलप्रख्यश्चक्रशा
र्ङ्गगदाधरैस्समन्वितः ॥ [illegible]श्चित्रमाल्यांबरधरः पुंडरीकनिभेक्षणः ॥ गोविंदः शंखवर्णः स्यात्पद्म[illegible]ख
गदासमन्वितः ॥ रक्तारविंदपादाब्जस्तप्तकांचनभूषणः ॥ गौरवर्णो भवेद्विष्णुः शंखचक्रहलासिमान् ॥
क्षौमांबरधरः स्वर्णकेयूरांगदभूषितः ॥ अरविंदनिभः श्रीमान्मधुजित्कमलासनः ॥ चक्रशार्ङ्गं च मु
शलं पद्मं दोर्भिर्बिभर्त्यसौ ॥ त्रिविक्रमो रक्तवर्णः शंखचक्रगदासिमान् ॥ किरीटहारकेयूरकुंडलैश्च विरा
जितः ॥ वामनः कुंदवर्णः स्यात्पुंडरीकायतेक्षणः ॥ दोर्भिर्वज्रगदाशंखपद्मं धत्ते स विभर्त्यसौ ॥ श्रीधरः पुंडरी राम॰ ४

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

म॥ दिक्ष्वष्टमध्येचत्वारिविन्यस्येत्पुरतोहरेः॥ विलिखेत्तत्रपुंड्राणिविस्तारायामभेदतः॥ तेष्वर्चयेत्ततोधीमा
न्केशवादीननुक्रमात्॥ तत्रतत्रचतन्मूर्तिंध्यात्वामंत्रैसमर्चयेत्॥ गंधपुष्पादिकं[illegible]लंमंत्रेणवार्चयेद्गुरुः
॥ प्रदक्षिणमनुव्रज्यसशिष्यःप्रणमेद्दध्य॥ तद्यहतानीक्षयेच्छिष्यंकेशवादीननुक्रमात्॥ द्वादशविन्यस्यपुंड्राणि
गुरूक्तानिसदैवमव॥ श्रुत्वैणवमदाप्नाह्निमयास्तुसमाहितः॥ त्रिसंध्यासुमदाविप्रोयागकालेविशेषतः॥
श्राद्धदानेतथाहोमेस्वाध्यायेपितृतर्पणे॥ कुर्यात्तूर्ध्वपुंड्राणिविनयात्द्विजसत्तमः॥ तदर्शाध्याघरेन्नि
त्यमूर्ध्वपुंड्रंविधानतः॥ श्राद्धंहोमस्तथादानंस्वाध्यायःपितृतर्पणम्॥ भस्मीभवतितत्सर्वंऊर्ध्वपुंड्रंविनाकृ
तं॥ ऊर्ध्वपुंड्रंविनायस्तुश्राद्धंकुर्वीतसद्विजः॥ सर्वंतद्राक्षसै[illegible]र्नीतंनरकंचाधिगच्छति॥ ऊर्ध्वपुंड्रविहीनंतु
यःश्राद्धेभोजयेद्द्विजं॥ अश्नंतिपितरस्तस्यविण्मूत्रंनात्रसंशयः॥ तस्मात्तुसततंधार्यमूर्ध्वपुंड्रंद्विजन्मना
॥ धारयेन्नतिर्यक्तुप्रमादेनापिकदाचन॥ तिर्यक्पुंड्रधरंविप्रंचाण्डालमिवसंत्यजेत्॥ सोनर्हःसर्वक
र्मसुसर्वलोकेषुगर्हितः॥ ऊर्ध्वपुंड्रविहीनःसन्संध्याकर्मसमाचरेत्॥ सर्वंतद्राक्षसैर्नीतंनरकंचा
धिगच्छति॥ यच्छरीरंमनुष्याणामूर्ध्वपुंड्रविवर्जितं॥ द्रष्टव्यंनैवतत्किंचित्श्मशानमिवतद्भवे
त्॥ ऊर्ध्वपुंड्रंमदाशुभ्रंललाटेयस्यदृश्यते॥ चाण्डालोपिसशुद्धात्माविष्णुलोकेमहीयते॥ ऊर्ध्वपुंड्रस्य
मध्येतुललाटेसुमनोहरे॥ लक्ष्म्यासहसमासीनोरमतेतत्रवैहरिः॥ निरंतरालंयःकुर्यादूर्ध्वपु
ण्ड्रंद्विजाधमः॥ सहितत्रस्थितंविष्णुंश्रियंचैवव्यपोहति॥ अच्छिद्रमूर्ध्वपुंड्रंतुयःकरोतिद्विजाधमः 4

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सा॰ स॰ हरेः परं पितुर्नाम योद्यात्परमं सुतं ॥ अविरोधेन देवेति तत्तीयं श्रुतिचोदितं ॥ तस्मान्नामवतो नाम सर्वेषां
॥५॥ श्रुतिचोदितं ॥ इति नामसंस्कारस्तृतीयः ॥३॥ एवं तत्तीयसंस्कारं कृत्वा देवेश्वरो न मः ॥ चतुर्थं मंत्रसंस्का
रं कुर्वीत देशिकोत्तमः ॥ प्रातः स्नात्वा विधानेन पूजयेज्जगतीपती ॥ अष्टोत्तरसहस्रं तु मंत्ररत्नं जपेद्गुरुः
स्नानं शिष्यं समाहूय सुवेषं समलंकृतं ॥ आदाय कलशं रम्यं पवित्रोदकपूरितं ॥ पंचपल्लवसंयुक्तं पंचरत्न
समन्वितं ॥ मंगलद्रव्यसंयुक्तं मंत्रेणैवाभिमंत्रयेत् ॥ समार्पयेत्ततः शिष्यं तत्फलेन कुशैः शुभैः ॥ सूक्तैश्च विष्णुदे
वत्यैः पावमानैस्तथैव च ॥ अष्टोत्तरशतं पश्चान्मंत्ररत्नेन मार्जयेत् ॥ अभिषिंच्य ततो मूर्ध्नि शुक्लवस्त्र
धरं शुचिं ॥ स्वलंकृतं समाचांतं ऊर्ध्वपुंड्रधरं तथा ॥ पवित्रहस्तं पद्माक्षमालया समलंकृतं ॥ निवेश्य दक्षि
णे स्वस्य आसने कुशनिर्मिते ॥ स्वगृह्योक्तविधानेन पुरतोग्निं प्रकल्पयेत् ॥ पौरुषेण तु सूक्तेन श्रीसूक्ते
न तथैव च ॥ मध्वाज्यमिश्रितं रम्यं पायसं जुहुयाद्गुरुः ॥ अष्टोत्तरशतं पश्चादाज्यं मंत्रद्वयेन च ॥ मूलमंत्रेण
5 जुहुयाच्च गुरुर्घृतविनिश्चितं ॥ केशवादीन्समुद्दिश्य नित्यान्मुक्तांस्तथैव च ॥ एकैकमाहुतिं हुत्वा होमशेषं
समापयेत् ॥ ततः प्रदक्षिणं कृत्वा नमस्कृत्वा जनार्दनम् ॥ आचार्यः स्वगुरुं नत्वा जपेद्गुरुपरंपरां ॥ मातरं स
र्वजगतां प्रपद्येत श्रियं ततः ॥ त्वं माता सर्वलोकानां सर्वलोकेश्वरप्रिये ॥ अपराधसतं जुष्टं आश्रयत्वेन मच्यु
त ॥ एवं प्रपद्य लक्ष्मीं तां श्रियं सद्गुरुमावतः ॥ नित्ययुक्तं तया देव्या वात्सल्यादिगुणान्वितं ॥ शरण्यं सर्व
लोकानां प्रपद्येत सनातनं ॥ नारायण दयासिंधो वात्सल्यादिगुणाकर ॥ एनेरहं जगन्नाथ बहुजन्मापरा
२ धिनं ॥ त्वाचार्येण संदिष्टः प्रपद्येत जनार्दनं ॥ प्रपद्येत ततः शिष्यो गुरुमेव दयानिधिं ॥ गुरो त्वमेव देव ॥राम॰॥ ॥५॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

का[?]भः चर्मशार्ङ्गासिपद्मभृत् ॥ रक्तांबरविदनयनो मुक्तादामविभूषितः ॥ विष्णुर्वर्णो हृषीकेशः श्वेतकशार्ङ्गसि
लासिभृत् ॥ रक्तांबरविदनयनो त्पीतांबरधरः पुंडरीकावतंसकः ॥ इन्द्रनीलनिभः शंखचक्र[?]पद्मगदाधरः ॥
पद्मनाभः पीतवासाः चित्रमाल्यानुलेपनः ॥ दामोदरः शार्ङ्गलाभः ॥ प[?]द्मशार्ङ्गासिशंखभृत् ॥ पीतवासा विस
लाक्षीमालारत्नविभूषितः ॥ एवं पुंड्राणि संततं धारयेद्वैष्णवोत्तमः ॥ पुंड्रसंस्कार इत्येवं सिद्धेणापि च कारयेत् ॥ त
त्रशेषं समाप्याथ ब्राह्मणान् भोजयेत्ततः ॥ इति पुंड्रसंस्कारो द्वितीयः ॥ २ ॥ तृतीयं नामसंस्कारं कुर्वीत पुनवास
रे ॥ स्नात्वा संपूज्य देवेशं गंधपुष्पादिभिर्गुरुः ॥ नामाधिदैवतं पश्चात्पूजयेत्प्रयतात्मवान् ॥ द्वादशैव तु मा
सास्तु केशवाद्यैरधिष्ठिताः ॥ आरभ्य मार्गशीर्षं तु यथासंख्यं द्विजोत्तमः ॥ यस्मिन्मासि भवेद्दीक्षा तन्मूर्त्तिनो
म चोदितं ॥ नृसिंहरामकृष्णाख्यनामवाथ प्रकल्पयेत् ॥ शक्त्यावेशावताराणां वर्जयेन्नाम वैष्णवः ॥
नाम दद्यात्प्रयत्नेन वैष्णवं पापनाशनं ॥ यस्य वै वैष्णवं नाम नास्ति चेत्तु द्विजन्मनः ॥ अनामिकः स विज्ञे
यः सर्वकर्मसु गर्हितः ॥ चक्रस्य धारणं यस्य जातकर्मणि संभवेत् ॥ तत्रैव मासनामापि दद्याद्विप्रो वि
धानतः ॥ ध्यात्वा समर्चयेन्नाममूर्त्तिमंत्रेण देशिकः ॥ धूपं दीपं च नैवेद्यं तांबूलं च समर्पयेत् ॥ प्रदक्षि
णमनुव्रज्य भक्त्या सम्यक् प्रणम्य च ॥ तन्मंत्रं मंत्रवाजपेत्स सहस्रसंख्यया ॥ पश्चाद्धोमं प्रकुर्वीत शतमष्टो
त्तरं हविः ॥ वैष्णवैरनुवाकैश्च जुहुयात्सर्पिषा तथा ॥ नाम दद्यात्तथा शिष्यं तत्रैतोयसमाश्रुते ॥ ततः पुष्पा
जलिं दत्वा होमशेषं समापयेत् ॥ वैष्णवान्भोजयेत्पश्चाद्दक्षिणाभिश्च तोषयेत् ॥ एवं हि नामसंस्कारं कुर्वी
त द्विजसत्तमः ॥ गुणयोगेन चान्यानि विष्णोर्नामानि लौकिके ॥ विशिष्टं वैष्णवं नाम सर्वकर्मसु चोदितं ॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

हा० स्म०
६

सुसत्पथे निवसेत्सदा कर्मणा मनसा वाचा शरीरेणैव नेजेत्सुधीः यावच्छरीरपातं तु व्रतमावर्त्तयेत्स।
दा एवं मंत्रविधिना सम्यक् मंत्रसंस्कारसंस्कृतः इति मंत्रसंस्कारश्चतुर्थः ४ मंत्रार्थतत्वविदुषया
गतत्रैनियोजयेत् पूर्वाह्णे पूजयेद्विष्णुं तस्य प्रियकरं शुभं मंत्ररत्नविधानेन गंधपुष्पादिभिर्गुरुः अर्च
यित्वाच्युतं भक्त्या होमं पूर्ववदाचरेत् सर्वैश्चैव स्वैः सक्तैः पायसं घृतमिश्रितं आज्यं मंत्रेण होतव्य
शतमष्टोत्तरं तथा शक्त्या चैव स्ववैमंत्रैः सर्वैर्होमं समाचरेत् एकैकमाहुतिं निष्पाः सर्वावरणदेवताः
प्रणवादिचतुर्थ्यंते स्वैः स्वैर्नामभिर्यजेत् होमशेषं समाप्याथ वैष्णवान्भोजयेत्तथा। मंत्ररत्नेन तं
विष्णुं पुष्पांजलिशतैर्यजेत् प्रणम्य मंत्रराट् देवराज त्वा मंत्रमनुत्तमं आद्यपप्रणतं शिष्यं तद्विब
दर्शयेद्गुरुः कृपया यत्तु तत्तस्मै दद्याद्विबुधे गुरुः एवं द्वारका जगन्नाथ केवलं कृपया तव। अर्चनं
यत्कृतं तेन विभो स्वीकर्त्तुमर्हसि एवं लब्ध्वा गुरोर्विष्णुं पूजयेत्तत्प्रपन्नतः हिरण्यवस्त्राभरण
यानशय्यासनादिभिः ततः प्रभृति देवेशं चार्चयेद्विधिना सदा आतस्मात्ताग्गमोक्षाणं ध्यात्वा नपत
पमच्युत इति श्रीहारितस्मृतौ विशिष्ट धर्मशास्त्रे पंचसंस्कारविधानं नाम द्वितीयोऽध्यायः २
अम्बरीष उवाच भगवन्सर्वमंत्राणां विधानमसुव्रत ब्रूहि सर्वमशेषेण प्रयोगं सार्थसत्कृते १
हारित उवाच शृणु राजन् प्रवक्ष्यामि मंत्रयोगमनुत्तमं येयात्को विष्णुना पूर्वं ब्रह्मणः परमात्म
ना १ सर्वेषामेव मंत्राणां प्रथमं गुह्यमुत्तमं मंत्ररत्नं नपश्रेष्ठ सद्यो मुक्तिफलप्रदं सर्वैश्वर्यप्र

हा०
६

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स्त्वंत्वमेवपरमागतिः त्वमेवपरमोधर्मस्त्वमेवपरमंतपः इतिप्रपन्नमाचार्यानिवेश्यपुरतोहरेः प्रा
गग्रेषुसमासीनंदर्भेषुसमाहितं स्वाचार्यपुरतोध्यात्वानमस्कृत्वाथभक्तिमान् गुरोःपरंपराजप्त्वाहृदिध्या
त्वाजनार्द्दनं कृपयावीक्षयतंशिष्यंदक्षिणंजानदक्षिणं निक्षिप्यहस्तंशिरसिवामंहृदिविन्यसेत् पादौग
हीत्वाशिष्यस्तुगुरोःप्रयतमानसः भोगुरोब्रूहिमंत्रंसर्वंयाथार्थ्यंदयानिधे अध्यापयेत्ततस्तस्मैमंत्ररत्नं
शुभाह्वयं सन्यासंचसमुद्रंचसर्षिच्छंदोधिदैवतं सार्थमध्यापयेच्छिष्यप्रपत्तिंशरणागतिं अष्टाक्षरंद्वाद
शार्णंषडर्णंवैष्णवंतथा रामकृष्णनृसिंहाख्यंमंत्रांस्तस्मैनिवेदयेत् न्यासेवाप्यर्चनेवापिमंत्रमेकांतिनेध्यै
त् अवैष्णवोपदिष्टेनमंत्रेणनरकंव्रजेत् अवैष्णवाद्गुरोर्मंत्रंयःपठेद्वैष्णवोद्विजः कल्पकोटिसहस्राणिप
च्यतेनरकाग्निना अचक्रधारिणंविप्रंमंत्रमध्यापयेत्तुयः रौरवंनरकंप्राप्यचांडालयोनिमाप्नुयात् त
स्माद्दिक्षाविधानेनशिष्यंभक्तिसमन्वितं मंत्रमध्यापयेद्विद्वान्वैष्णवंपापनाशनं अनधीत्यद्वयंमंत्रं
योन्यंवैष्णवमुत्तमं अधित्यमंत्रंसंसिद्धिंनप्राप्नोतिनसंशयः जातकर्माणिवाचौलेतथामौंजी
निबंधने चक्रस्यधारणंयत्रमंवेत्तस्यतुतत्रवै उपनीयगुरुःशिष्यंस्वगृह्योक्तविधिना
ततः अध्यापयेद्वसावित्रीतथामंत्रद्वयंशुभं प्राप्तमंत्रस्ततःशिष्यःपूजयेद्दक्षिणयागुरुं गोभू
हिरण्यरत्नाद्यैर्वासोभिःभूषणैरपि सद्धृतोदासयेच्छिष्यकआचार्य्याःसंसिलब्रतः स्वरूपसाधनं
साध्यंमंत्रेणास्मैनिवेदयेत् द्वयेनहीत्तयायात्म्यसम्यगस्मैनिवेदयेत् आचार्याधीनहित्ति

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

रा॰स्त॰ ७ श्यामं कोटिसूर्याग्निवर्चसं चतुर्भुजं सुंदरांगं सर्वाभरणभूषितम् पद्मासनस्थं देवेशं पुंडरीकनिभेक्षणा
म् रक्ताम्बरविटसदृसं दिव्यहस्तपदांचितं माणिक्यमुकुटोपेतं नीलकुंचितशीर्षजं श्रीवत्सकौस्तुभो
रस्कं वनमालाविराजितं दिव्यचंदनलिप्तांगं दिव्यपुष्पावतंसकं हारकुंडलकेयूरनूपुरादि
विराजितं कटकैरंगुलीयैश्च पीतवस्त्रेण शोभितं शंखचक्रगदापद्मपाणिनं पुरुषोत्तमम् वा
वामांके चिंतयेत्तस्य देवीं कमललोचनां तरुणीं सुकुमारांगीं सर्वलक्षणशोभितां दुकूलवस्त्र
संवीतां सर्वाभरणभूषितां तप्तकांचनसंकाशां पीनोन्नतपयोधरां रत्नकुंडलसंकीर्णां नीलकुंचि पुस्तं॰ ६
तमूर्द्धजां दिव्यचंदनलिप्तांगीं दिव्यपुष्पावतंसकां मातुलिंगं वरं रक्तं ज्वदर्पणं करदं तथा दविं
चविभ्रतीं दोर्भिश्चिंतयेदिष्टदां सदा एवं ध्यात्वार्चयेद्यत्नादच्युतं नित्यमेव हि पद्यात्मनि तथा दे
7 वे न्यासकर्म समाचरेत् अर्चयेदुपचारैश्च मनसा वा जनार्द्दनं आवाहनासनं पाद्यमर्घ्यमाच
मनीयकं स्नानवस्त्रोपवीतं च भूषणं गंधमेव च पुष्पधूपं तथा दीपं नैवेद्यं च प्रदक्षिणं नमस्का
रं च तांबूलं पुष्पमालां निवेदयेत् नमस्कृत्वा गुरून् पश्चाज्जपेन्मंत्रं समाहितः अष्टोत्तरसहस्रं
तु शतमष्टोत्तरं तथा ध्यात्वैनं वै मनसा देवं जपेदेकाग्रमानसः प्राङ्मुखो दङ्मुखो वापि समासी
नः कुशासने त्रिशः ध्यात्वा जपेद्देवं सर्वसिद्धिमवाप्नुयात् आदावंते जपस्यास्य प्राणायामं समा
चरेत् पूरकं कुंभकं रेच्य प्राणायामस्त्रिलक्षणः वामेन पूरयेद्वायुं वाघ्रनासा जपेन्मनुं उभा रा॰म॰ ७

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

दंपथ्यंसर्वेषांसर्वकामदं यस्योच्चारणमात्रेणपरितुष्टोभवेद्धरिः देशकालादिनियमंश्चारिमित्रादिशोधनं
स्वरवर्णादिदोषांश्चयोरश्चरणकं ननु ब्राह्मणाःक्षत्रियाःवैश्याःस्त्रियःशूद्रास्तथेतराः तस्याधिकारि
णःसर्वेसर्वसीलगुणायदि अनन्यसाधनायेतु अनन्यशरणास्तथा अनन्यभोग्यायेराजन्तस्यैवास्याधि
कारिणः पंचसंस्कारसंपन्नाश्चज्ञावलोनसुयकाः मत्त्यापरमयाविष्टोयुक्तास्तस्याधिकारिणः पंचवि
शाक्षरोमंत्रपदैःषड्भिःसमन्वितः वाक्यद्वयपरंमंत्रंज्ञेयंरत्नमनुत्तमं जगदाश्रयणीयाश्रीःसंश्रिताजग
तांपतिं तयानित्यानपायिन्यासंयुतःपरमःपुमान् नारायणोच्युतश्रीमान्वात्सल्यगुणसागरः
नाथःसुशीलःसर्वज्ञःशक्तिमान्परःपुमान् आप्तकामःसत्यमित्रपरिपूर्णमनोरथः दयासुधाब्धिसं
विताचार्यो मान्धुविवान्वशी प्रपद्येचरणौतस्यशरणंश्रेयसेमम श्रीमतेविष्णवेनित्यसर्वाव
स्थासुसर्वदा निर्ममोनिरहंकारःकैंकर्यंकरवाण्यहं एवमर्थविभिस्त्वेवपश्चान्मंत्रंप्रयोजयेत्
॰ नारायणोऋषिश्छंदोगायत्रीचपराशुभा स्वयंनारायणःश्रीमान्देवतासमुदाहृतः करयो
स्तलयोराद्यमष्टाक्षरंविन्यसेद्द्विजः शेषाक्षराणिदेयानिचतुर्विंशतिपर्वसु षट्पदैरंगुलीन्यास
मंगेषुचयथाक्रमं षडंगषट्पदैःकृत्वामंत्राणांश्चयथाक्रमं मूर्ध्निभालेनेत्रनासाश्रवणेषुतथान
ने भुजयोर्हृत्प्रदेशेचस्तनयोर्नाभिमंडले पृष्ठेचजघनेनिकटयोमूर्वोर्जान्वोश्चपादयोः पंचवि
शाक्षराण्यस्यक्रमेणांगेषुविन्यसेत् एवंन्यासविधिंकृत्वापश्चाद्ध्यानसमाचरेत् इंदीवरदल

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

त

रा० स्त ८ संशयः गवामयुतदानस्य पृथिव्या मंडलस्य च कन्याशतसहस्रस्य राजाश्वानां तथैव च
दानस्याप्यत्फलं नणां सम्यात्रेनुपनेदत्तं: शतवारमनुं जप्त्वा विष्णुसायुज्यमाप्नुयात् पदत्र
यात्मके मंत्रे चतुर्थ्यासहितैस्तथा स्वोरूपसाधनोपेयेमितिमत्वा जपेद्बुधः प्रणवे सर्वरूपा
स्यात्साधनं मनसा सह सविभक्त्याचतुर्थ्यात्र पुरुषार्थोभवेन्ननु अकारं चाप्युकारं च
मकारं चेत्त्रितत्वतः तान्येकधासमभवंस्तदोमित्येतदुच्यते तस्मादोमिति विज्ञेयः
प्रणवः सोक्षरात्मकः वेदत्रयात्मकस्त्रेयं भूर्भुवः स्वरितीति वे अकारस्तु भवेद्विष्णुर्
ऋग्वेद उदाहृतः उकारस्तु भवेल्लक्ष्मीर्यजुर्वेदात्मको मतः मकारस्तु भवेज्जीव त
४ स्तयोर्दासमुदाहृतः पंचविंसाक्षरः साक्षात्सामवेदस्वरूपवान् पंचविंशोयं पुरु
षः पंचविंशकं प्रात्मेतिश्रुतिः आत्मा पंचविंशस्यादितिस्वात्मानं संस्मरेत् इत्युदाहृतम
वे र्थं विदित्वास्वं निवेदयेत् अवधारणमन्यत्तु मध्यमाक्षं वदंति हि तद्वेवाग्निस्तथावायुस्तस्य
कृत्वा र्यस्तदु चंद्रमाः इत्यवधारणोंकृतेरेवोपबृंहिते उकारेणोच्यते श्रीश्चाव्यः प्रोच्यते मुनिसत्त
मैः न्यायेन गुणशब्दस्य तस्य वश्रीपतेर्वशः श्रीरस्य ईशानाजगतो विष्णुपत्नीति वै श्रुति
कल्याणगुणसिद्धिस्तु लक्ष्मीर्भर्तुर्जनेतरा सामानाधिकरण्यत्वात्कारणत्वं तयोश्च रामं० ८

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

न्याधारणं वायोः कुंभकं समुदाहृतं तद्वेचनं दक्षिणे न रेचकं समुदाहृतं पर्यायेण तथा पुनश्चै
वं प्राणायामत्रयं चरेत् पूरके कुंभके चैव रेचके च विशेषतः अष्टाविंशति वारं तु जपे
न्मंत्रसमाश्रितः उत्तमं मुनिभिः प्रोक्तं प्राणायामेन पोत्तमः जपन्द्वादश वारं तु मध्य
मं तु प्रकीर्तितं षड्वारं तु कनीयस्यात्त्रिवारमधमं स्मृतं मनसैवाथवा ध्येयं देवं पश्चा
दर्थं विचिंतयेत् प्राणायामत्रयं कृत्वा पश्चान्न्यासं समाचरेत् स्नात्वा शुक्लांबरधरः
कृत्वा संध्यादिकर्म च धृतोर्ध्वपुंड्रदेहश्च पवित्रकर एव च धृत्वा पद्माक्षमालां च
संनिधायासने स्थितः भूतशुद्धिविधानं च कृत्वा मंत्रं प्रयोजयेत् अष्टाक्षरस्य मंत्रस्य
गुरुर्नारायणः स्मृतः छंदश्च देवी गायत्री परमात्मा च देवता ज्ञेयश्चाष्टाक्षरो मंत्रः सर्व
पापप्रणाशनः सर्वदुःखहरः श्रीमान् सर्वकामफलप्रदः सर्ववेदात्मको मंत्रस्ततो मो
क्षप्रदो नृणां ऋचो यजूंषि सामानि तथैवाथर्वणानि च सर्वमष्टाक्षरांतस्थं यच्चान्य
दपि वाङ्मयं सर्वे वेदा वेदगर्भस्था वेदाश्चाष्टाक्षरे स्थिताः अष्टाक्षरस्य प्रणवे अका
रे प्रणवः स्थितः ऐहलौकिककामेष्वर्थं स्वर्गाद्यं पारलौकिकं कैवल्यं भगवत्तं च मंत्रोऽयं
साधयिष्यति सकृदुच्चारणान्नृणां चतुर्वर्गफलप्रदं स्वरूपसाधनं प्राप्य ददा
ति हि समं जसा महापापं चातिपापं उपपापं तथैव च सकृदष्टाक्षरं जप्त्वा लभते नात्र



CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

रा०रह०
१४

दास्यभोऽस्त्वाभिधीयते अणुज्ञानाश्रयो नित्यो निर्विकारोऽव्ययः सदा देहेन्द्रियात्परो ज्ञाता कर्त्ता भोक्ता
सनातनः मकारवाच्यो जीवोऽसौ दासस्त्वं हि सर्वदा श्रीशस्याकारवाच्यस्य विश्वोरस्य जगत्पतेः।
स्वस्वामिनोरूकारेण मध्यावधारणमुच्यते स्वाजीवस्यार्थे हरिः स्वामी सर्वदा न परस्तमः अनयो
र्नान्यथेत्युक्तं उकारेण महर्षिभिः इत्येवं प्रणवस्यार्थः प्रथमस्य पदस्य तु आत्मनः स्वस्वरूपत्वाधि
ज्ञेयमृषिसत्तमैः सर्वेषामेव मन्त्राणामाकारं प्रणवं स्मृतेः तस्माद्व्याहृतयो जातास्ताभ्यो वेदत्रयं तथा
नारत्येव ऋग्वेदो भुव इति यजुस्तथा स्वरिति सामवेदस्यात्प्रणवो भूर्भुवःस्व मूर्विष्णुस्तथास्य ये से
न्यपस्त्वविज्जज्ञिरे यस्ताव्याहृतिकृत्वा सर्ववेदजुहोति वै प्रसंगात्कथितं चेदं मन्त्रशेषमुदीर्यते स्व
९ स्वतंत्र्यात्तु जीवानामधीनं परमात्मनः नमसा प्रोच्यते तस्मिन्नस्ति नाममतो हि तत् स्वरूपादित्रिवर्गस्य
संशयः पुरतः पृष्ठतश्चैव पार्श्वतश्च विशेषतः नमसैवेदं पतेराजन्त्रिवर्गः सर्वदैहिनां मकारे
णास्वतंत्रस्यान्नकारस्तन्निषिध्यति तस्माद्धि नम इत्यत्र स्वातंत्र्यमपनोति हि षडक्षरस्तन्मवेन्मा
त्यक्षरस्तु हि शाश्वतं ममेति द्व्यक्षरं मृत्युः न ममेति च शाश्वतं। नमस्तेति हि सर्वत्र स्वातंत्र्यमस्ति ता
यवे युज्यते मुनिभिः सम्यक् सर्वकर्मसु पार्थिव तस्मात्तु नमसा युक्ता मन्त्राः सर्वे च पार्थिव। सर्वसिद्धि
प्रदानं एतं भवेत्यत्र न संशयः नमसा रहिता ये तु न हि मुक्ति प्रदानं णां तस्मात्तु नमसैवेषां पारतन्त्र्य
मिरितं तु नमसा रहितं लोके किंचिदत्र न विद्यते नमो देवेभ्यो नम इति स्वामीशो तथा मत दत्तवि राम०
१४

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ते अकारस्यसर्वेषांअक्षराणांनिकारणं अकारोवैसर्वावागित्यादिश्रुतिवचस्तथा स्पर्शो
ष्मभिर्व्यज्यमानोनानाबहुविधोभवत् कारणत्वंतथैवास्यविष्णोर्वैजगतांपते: तस्मात्स्रष्टाचधा
ताचविधाताजगतांहरि: रक्षिताजीवलोकस्यविष्णोर्वैजगतांपतेर्गुणानांनेवसर्वग: अन
न्याविष्णुनालक्ष्मीर्भास्करेणप्रभायथा लक्ष्मीमनुपगामिनीमितिवचोमहत्तु तस्मादकारोवै
विष्णुश्रीशश्चजगत्पति: लक्ष्मीपतित्वंतस्यैवनान्यस्येतिसुनिश्चितं नित्यैवेषाजगन्माता
हरे:श्रीरनपायिनी यथासर्वगतोविष्णुस्तथैवेयंजगन्मयी तस्मादकारोवैविष्णुर्लक्ष्मीभर्ताज
गत्पति: तस्मिंश्चतुर्थीलुप्तत्वात्त्रिपदस्यचसंभवे: अकारप्रथमात्तस्माच्चतुर्थ्यासंभवेनतु न
च्चश्रुतिविरोधत्वान्नयुक्तमितिचोदिते मदेसेवलक्षणत्वाच्चौमित्यात्मनियुञ्जीत परस्यचा
त्मनांतस्मात्भेदस्तत्रसुनिश्चित: त्वमेवास्माकंतवास्मीतिश्रुत्युक्तमितिपार्थिव तौशास्यतोवि
वाधीनाविश्वेयुतायितिवेतथा त्वंसगस्त्रीच्छरूपयाप्राणेवात्मास्वविष्णुमतं असावमत्यैमिर्वे
नयेनान्येवसयोनिता इत्यादिश्रुतयोभेदंविदंतिपरमात्मयो: दास्यमेवात्मनोविष्णोस्वरूपपरमा
त्मन: स्वामीलक्ष्मीपते:प्रोक्तंदेवादीनांतथात्मना अनन्योन्यशेषरूपावैजीवात्मस्यजगत्पते: ।
दास्यत्वरूपसर्वेषामात्मनांसततंहरे: भगवच्छेषमात्मानमन्यथायप्रपद्यते सएवहिमहापापी
चांडालस्यान्नसंशय: तस्मात्मकारवाच्योसौपंचविंशात्मक:पुमान् अकारवाच्यस्यैसस्य

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

द्वा०स्म० १०

देवीछंदोधिदेवता परमात्मासलक्ष्मीसोविष्णुरेवार्चितोहरिः प्रणवस्तमवेद्वीजंचतुर्थीशक्तिरुच्यते ।
क्रुद्धोल्काय महोल्काय वीरोल्कायतथैवच द्युल्कायसहस्रोल्कायपंचांगन्यासमुच्यते हृन्मूर्द्ध्निशि
खायांवाककवचेनेत्रयोर्न्यसेत् पंचांगन्यासमित्युक्तं सर्वमंत्रेषुवैष्णवैः पदत्रयेणकुर्वीतषडंगंतुयथाक्र
म मूर्ध्न्यासनेचहृदयेभुजयोर्जघनेतथा पृष्ठेचजान्वोःपदयोर्मंत्राणानियथान्यसेत् अष्टाक्षराणिपृष्ठदिक्षु
ष्वनुक्रमेणतदनंतरं नासिकायांतथास्येचश्रोत्रयोरसनेतथा कंठेच स्तनयोर्नाभौगुह्येचतदनंतरं
अचक्रायविचक्रायसुचक्रायतथैवच ज्वालाचक्रायसुचक्रायत्रैलोक्यासुररक्षांतकायच आधारका
लचक्रायदशदिक्षुयथाक्रमं स्वाहांतप्रणवाद्यंचविन्यसेच्चक्रकाणिवैष्णवः एवंन्यासविधिंकृत्वापश्चा
20 द्ध्यानसमाचरेत् हृदयेपुलिमायांवाजलेसवितृमंडले वह्नौचस्थंडिलेवापिचिंतयेद्विष्णुमव्ययं वा
लार्ककोटिसंकाशंपीतवस्त्रंचतुर्भुजं पद्मनेत्रंविशालाक्षंसर्वाभरणभूषितं शंखचक्रगदापद्मा
न्दधानंर्निदोर्भिरेवच धृतश्रीभूमिसहितंआसीनंपरमासने तच्चाधारशक्त्याद्यैःसूरिभिर्वृतं । घर्मोद्यः
दिव्यरत्नमयेपीठेपंकजेष्टदलेशुभे तत्कर्णिकोपरितलेतप्तकांचनसन्निभे देविभ्यांसहितंतस्मिन्नी
सीनंपंकजासने चिंतयेद्दक्षिणेपार्श्वेलक्ष्मीकांचनसन्निभां पद्महस्तांविशालाक्षीदुकूलवसनांशु
भां वामेदूर्वादलश्यामांविचित्राभरणभूषितां चिंतयेद्धरणीदेवींनीलोत्पलधरांशुभां मंदिरेष्वष्ट
दलाग्रेषुचिंतयेद्घत्तचामरं: एवंध्यात्वाहरिंनित्यंजपेत्प्रयतमानसः स्नातःशुक्लांबरधरःकृत राम० १०

ए:

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

देतुनमसाऽऽश्रविवाक्कीतिवैश्रुतिः क्षयैकारसंप्रोक्तो नकारस्तन्निषिध्यते तस्मात्तु नर इत्युक्तो नित्य
त्वेनोच्यते जनैः नाराइति समस्तत्वे वाऽऽत्मजास्तु नरस्य वै तेषामयनमावासस्तेन नारायणः स्मृतः
महाभूतान्यहंकारो महदव्यक्तमेव च अण्डं तदन्तर्गता ये लोकाः सर्वे चतुर्द्दश चतुर्विधश
रीराणि कालकर्मेति वै जगत् प्रवाहरूपेणैवैषां नारत्वेनोच्यते बुधैः तेषामपि निवासत्वा
न्नारायण इतीरितः अन्तर्वहिश्च जगतो धाता त्राता सनातनः स्रष्टा नियन्ता शरणं विधाता
विश्वभावनः माता पिता सखा भ्राता निवासश्च सुहृद्गतिः योसौ श्रियः श्रीपरमः तेन नारायणः स्मृतः
नराणां सर्वजगतामयनं शरणं हरिः तस्मान्नारायण इति मुनिभिः संप्रकीर्त्यते सर्वेषु देशकालेषु
सर्वावस्थासु सर्वदा तस्यैव किंकरोस्मीति चतुर्थी परमात्मनः भगवत्परिचर्यैव जीवानां फलमुच्य
ते तद्विना शरीरेण पातनीयः जनस्य चैतु यस्मिन्शरीरे जीवानां न दास्यं परमात्मनः तदेव नि
रयं प्रोक्तं सर्वदुःखफलं भवेत् दास्यमेव फलं विष्णोः दास्यमेव परं सुखं दास्यमेव परं मोक्षं दास्यमे
व परं तपः ब्रह्माद्याः सकला देवा वशिष्ठाद्या महर्षयः कांक्षन्ते परमं दास्यं विष्णोरेव जयन्ति ते तस्मा
च्चतुर्थ्या मन्त्रस्य प्रधानं दास्यमुच्यते तद्दास्यवृत्तिर्जीवानां नाराद्देतुः परस्य हि इत्थं संचिन्त्य मन्त्रार्थं ज
पेन्मन्त्रमतन्द्रितः अविदित्वा मनोरर्थं जपेल्लप्यतमानसः न स सिद्धिमवाप्नोति स्वरूपं च न विन्द
ति सन्यासं च समुद्रं च सर्षिछन्दोधिदैवतं सार्थं सयज्ञं ध्यानं मंत्रमेवं प्रपूजयेत् नारायणर्षिगायत्रि



CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

क्षरोमंत्रोनित्यंप्रियतमोहरेः आसीनोवाशयनोवातिष्ठन्वायत्रकुत्रचित् जपेद्द्वादशाक्षरंमंत्रंतस्यविष्णुःप्रसीद
ति सस्नातःसर्वतीर्थेषुसर्वयज्ञेषुदीक्षितः अधीतःसर्ववेदानांयोजपेत्सततंमनुं ब्रह्मलोकघ्नोवाकृ
तघ्नोवामहापापयुतोपिवा अष्टाक्षरस्यजप्तारःसर्वपापैर्विमुच्यते अष्टाक्षरस्यजप्तारोयेप्यभागवता
न्नमाः पुनंतिसकलंलोकंसदेवासुरमानुषं अष्टाक्षरस्यजप्तारंप्रणमेद्यस्तुभक्तितः सर्वपापविनि
र्मुक्तोविष्णुलोकेमहीयते अचिंत्यमेतन्माहात्म्यंमनोरस्यजगत्पते नहिवक्तुंमयाशक्यंब्रह्मादिदि
क्पतेरपि अथवक्ष्यामिमाहात्म्यंद्वादशार्णस्यपार्थिव यस्योच्चारणमात्रेणद्वादशाब्दफलंभवेत्
नमोभगवतेतुभ्यंवासुदेवायशार्ङ्गिणे प्रणवेनसमायुक्तंद्वादशार्णंमनुंजपेत् पूर्ववत्प्रणवस्या
र्थेनमसश्चमहात्मनोः ऐश्वर्यंचतथावीर्यंतेजःशक्तिरनुत्तमा ज्ञानवैराग्यमेतेषांषण्णांभगइतीरि
तः षड्भिर्गुणैःपूर्णोसोयोयस्सएवभगवान्हरिः नित्याचयाभगवतिप्रोच्यतेमुनिसत्तमैः ऐश्वर्य
रूपासादेवीसुभगाकमलालया ईश्वरीसर्वजगतांविष्णुपत्नीसनातनीतस्याःपतित्वाद्धीशस्यभ
गवानितिचोच्यते तस्मात्तुभगवान्श्रीमानेकार्थौमुनिभिस्मृतः भगवानितिशब्दोयंतथापुरुषइ
त्यपि निरूपाधिचवर्त्तेतेवासुदेवेखिलात्मनि वदंतिकेचिद्भगवान्ज्ञानवानितिसत्तमाः तद्वा
सुदेवेनोक्तस्यात्सामान्यत्वात्ततोन्यथा तस्मात्कल्याणगुणवान्श्रीमान्योवसौजगत्पतिः सए
वभगवान्विष्णुःवासुदेवःसनातन भगवतेश्रीमतेचैत्येकार्थौप्रोच्यतेबुधैः गुणवान्भगवा राम० १२

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

कृत्वोपस्थाविधिं धृतोर्द्ध्वपुण्ड्रदेहस्तु पवित्रकरणोवच शुचिः कृष्णाजिनासीनः प्राणायामी च न्यासकृ
त् प्राङ्मुखोदङ्मुखोवापिदेवस्याभिमुखोपिवा प्राणायामत्रयंकृत्वा पश्चान्न्याससमाचरेत् शंखंचक्रंग
दापद्मशार्ङ्गखड्गान्यनुक्रमात् तार्क्ष्यंचवनमालांचमुद्राश्चाष्टप्रपूजयेत् पश्चाद्ध्यात्वाजगन्नाथमन
सैवार्चयेद्विभुं गंध पुष्पादिसकलंमंत्रेणैवनिवेदयेत् अनेनाभ्यर्चितोविष्णुस्ततः प्रीतोभविष्यति
अयुतंवासहस्रंवात्रि संध्यासुजपेन्मनुं विष्णोःसमानरूपेणशाश्वतंपदमाप्नुयात् आयुःकामीज
पेन्नीत्यंषण्मासंविजितेंद्रियः अयुतंतुजपेन्मंत्रंसहस्रंजुहुयाद्घृतं आयुर्निरामयंसम्यक्भवेद्वर्षा
शताधिकं विद्याकामीजपेन्मंत्रंत्रिसंध्यास्वयुतंमनुं जुहुयाद्विमलैःपुष्पैःसहस्रंसंयतेंद्रियः अष्टा
दशानांविद्यानांभवेद्व्याससमोद्विजः विवाहार्थीजपेन्नित्यंस्त्रैवर्षंचतुष्टयं लाजहोमीलभेत्कन्या
जन्मसाहस्रसंख्यया राज्यकामीजपेन्नित्यंषड्वर्षायुतंतु वा सहस्रंजुहुयान्नित्यंपायसंघृतसंश्रितं
चक्रवर्तीभवेत्सद्यःपद्मनाभप्रसादतः द्वादशाब्दंजपेदेवंसततंविजितेंद्रियः आज्यहोमीतु योनि
त्यमिंद्रत्वंलभतेनरः लक्षंजपेद्वयोनित्यंत्रिंशद्वर्षंजितेंद्रियः ब्रह्मत्वंवाशिवत्वंवासमाप्नोतिनसंश
यः यावज्जीवंतुयोनित्यमयुतंसुसमाहितः सहस्रंवासतंवापिहोतव्यंवह्निमंडले आज्येनचरुणावा
पितिलैर्वाशर्करान्वितैः पद्मैर्वाबिल्वपत्रैर्वासमिद्भिःपिप्पलस्यवा कोमलैस्तुलसीपत्रैरर्चयित्वास
नातनं अनंतविद्विजेशानां क्षिप्रमनन्यतमोभवेत् किमत्रबहुनोक्तेनसर्वसिद्धिप्रदोनृणां श्रीमदष्टा

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

रा०स्त०
१२

पदमेवात्रप्रोच्यतेमुनिसत्तमैः पदैश्चतुर्भिर्द्वादशभिरक्षरैरन्वितोमनुः साधकानांसदाराजन्नुका
मधेनुरितीरितः दशांगुलिषुतलयोर्द्वादशार्णानिविन्यसेत् पदैश्चतुर्भिरंगेषुविसेत्तदनंतरं चतु
रंगेषुविन्यस्यमंत्रेणाततयोर्ध्वयोः मूर्द्ध्नास्यनेत्रयोर्नाशाकर्णयोर्भुजयोस्तथा हृदिकुक्षौतथागुह्ये
ऊरुवौजान्वोश्चपादयोः मंत्रार्णानितुविन्यस्यक्रमेणैवनृपोत्तमः चक्रन्यासंततकुर्यात्पश्चात्ध्या
नंसमाचरेत् सुचक्रायविचक्रायसुचक्रायतथैवच तथात्रैलोक्यचक्रायमहाचक्रायवैतथा असु
रांतकचक्रायस्वाहांतप्रणवादिकं हृदयादिषडंगेषुयथाशास्त्रंप्रयोजयेत् क्षीराब्धौशेषपर्यंकेसमा
सीनंश्रियासह नीलजीमूतसंकासंतप्तकांचनभूषणं पीतांबरधरंदेवंरक्ताब्जदललोचनं स्वयमान
विमानस्थैर्देवगंधर्वकिन्नरैः स्वध्यात्वाहरिंनित्यंजपेन्मंत्रंसमाहितः अर्चयित्वाहृषीकेशंगंधकु
सुमैःसदा शालग्रामादिषुस्थानेष्वर्च्यमंत्रंजपेद्बुधः जप्त्वाद्वादशलक्षंयावज्जीवंसमाचरेत् सपत्का
मीजपेन्नित्यंवत्सरंतुसहस्रकं साज्यैश्चपद्मैर्हुत्वासहस्रंश्रीयमाप्नुयात् राज्यमैंद्रपदंवापिशि
वत्वंब्रह्मतामपि बहुकालंबिल्वपत्रैःकमलैर्वाजितेंद्रियः हुत्वाकामयतेयंयंततमाप्नोतिमानवः द्वा
दशार्णेनमनुनायक्षेपदेननृपोत्तमः द्वादशपूजयेद्विष्णुंकोमलेस्थलतुलसीदलैः विष्णुतुल्यवपुश्रीमान्
मोदतेपरमेपदे द्वादशार्णमनोरेवविधानंप्रोच्यतेनृपः अथतेसंप्रवक्ष्यामिषडक्षरमनोरिदं विधा
नंसर्वफलदंजन्मत्फनिहंतनं ॐनमोविष्णवेचेतिषडक्षरमुदाहृतं पूर्ववत्प्रणवस्यार्थंनमःशब्दउ

२२

राम०
१२

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

नेवम्भस्थितिसंसाररक्षकः द्वौद्वौगुणौसमाविष्टायसर्गाद्यमकरोत्प्रभुः प्रद्युम्नश्चानिरुद्धसंकर्षणइति
रितः भगवान्वासुदेवोसौसृष्ट्याद्यमकरोत्स्वयं ऐश्वर्यवीर्यवान्सर्गेप्रद्युम्नःप्रपद्यते तेजःशक्ति
समाविष्टश्चानिरुद्धोप्यपालयत् बलज्ञानेनतथातोतुसंकर्षणोप्यधिष्ठित अकरोद्भगवानेवसंहारंज
गतोस्यतु एवंषड्गुणपूर्णत्वात्पतित्वादपिचश्रियः सर्गादेःकारणत्वाच्चभगवानितिचोच्यते
सर्वत्रासौसमत्वंचवसत्यत्रेतिवैयतः ततःसवासुदेवेतिविद्वद्भिःपरिपद्यते चतुर्थीपूर्वकंविद्यां
कैंकर्यार्थमसात्मनः एवंज्ञात्वामनोरथ्यैद्वादशार्णस्यचक्रिणः संसिद्धिपरमाप्नोतिसम्यगावर्त्यचे
तसा गत्वागत्वानिवर्त्ततेसर्वक्रतुफलैरपि तज्ज्ञात्वाननिवर्त्ततेद्वादशाक्षरचिंतकाः द्वादशार्णंसकृ
ज्जप्त्वासर्वपापैःप्रमुच्यते ब्रह्महत्यादिपापानितत्संसर्गकृतानिच द्वादशार्णमहांकेनेर्जप्तुर्दहत्यग्नि
रिवेंधनं सर्वसौभाग्यसुखदंपुत्रपौत्रादिवृद्धिदं सर्वकामप्रदंनृणांश्चायुरारोग्यवर्द्धनं देवत्वममरे
शत्वंशिवत्वंब्रह्मतातथा द्वादशार्णमनुंजप्त्वासमाप्नोतिनसंशयः दुराचारोपिसर्वाशीकृतघ्नोवा
स्तिकोपिवा द्वादशार्णमनुंजप्त्वाविष्णुसायुज्यमाप्नुयात् प्रजापतिःकश्यपश्चमनुःस्वायंभुवस्तथा स
प्तर्षयोध्रुवश्चैतेऋषयस्तस्यकीर्तिता वशिष्ठःकश्यपोत्रिश्चविश्वामित्रश्चगौतमः जमदग्निर्भर
द्वाजोह्येतेसप्तमहर्षयः भगवान्वासुदेवोवैदेवतास्यप्रकीर्त्तितः छंदश्चपरमादेवीगायत्रीसमुदा
हृता तस्यापिपिप्रणवोबीजंऐश्वर्यशक्तिरुच्यते चतुर्थीमाहुरन्येतुशक्तिबीजंतथामनोः ऐश्वर्य

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ता०म०
१३

तं दिव्यपुष्परक्तहस्तांघ्रिपंकजं मुक्ताफलामंदतारत्नवनमालाविभूषितं श्रीवत्सकौस्तुभोरस्कं दिव्यपीतांबरं
हरिं तप्तकांचनवर्णाभं पन्नायापनहस्तया समाश्लिष्टमम्बुदेवं ध्यात्वा विष्णुसमो भवेत् नमस्तेवोपचा
राणि कृत्वा मंत्रं जपेत्ततः त्रिसंध्यासु जपेन्नित्यं सहस्रमष्टकं द्विज समाहितमनाजप्त्वा षडर्णानियैतेद्वि
यः तिलहोमायुतं कृत्वा सर्वसिद्धिमवाप्नुयात् एवं विष्णुमनोः क्रं विधानं पुरुषोत्तमः विधानं रघुनाथस्य मं श्री
त्रस्यापि च विमितं षडक्षरं दाशरथेस्तारकं ब्रह्म गद्यते सर्वैश्वर्यप्रदं नृणां सर्वकामफलप्रदं एतन्मेव प
रं मंत्रं ब्रह्मते रुद्राद्विष्णोश्रुयातः अथयज्ञमतात्मानो मुक्ताजगत्त्वामवाप्नुधी एतन्मंत्रमगस्त्यकजप्त्वास्त
त्वमाप्नुयात् ब्रह्मलोकं काश्यपो जप्त्वा कौशिकस्त्वमरेशतां कार्तिकेयमनुं श्रेष्ठवंद्राकेगिरिनारदाः बाल
13 खिल्यादिमुनयो देवतात्वं प्रपेदिरे इमंमेव जपन्मंत्रं रुद्रस्त्रिपुरहारकः ब्रह्महत्यादिनिर्मुक्तः पूज्यमानो
रू भवेत्सुरैः मुमूर्षापि कृदु काश्यांतु सर्वेषां त्यक्तजीविनां दिशत्येतन्महामंत्रं तारकं ब्रह्मनामकं तस्य श्रव
णमात्रेण सर्वेस्ववदिवं गताः श्रीरामायनमोपीय तारकब्रह्मनामकः नाम्नां विष्णोः सहस्राणां तुल्यमेव म
हाप्रभुः मूलेनामगवन्मंत्रा नानेनतु समाकृताः श्रियोरमणसामर्थ्याल्लेशदर्पगुणसागरात् श्रीराम इति
नामेदं तस्य विष्णोः प्रकीर्तितं रमयानित्यसंयुक्तत्वाद्रामपरत्वमिधीयते रकारमैश्वर्यबीजं मकारस्तेनसंयु
तः सुवधारणयोगेन रामेत्यस्मान्मनोः स्मृतः तस्माद्रामिति बीवीजं साध्वतस्यमनोः स्मृतः शक्तिः श्रीर्कथ्य
ते राजन् सर्वाभीष्टफलप्रदाः श्रियोमनोरमो यो सौ सराम इति विश्रुतः चतुर्थ्यानमस्खेवसार्धं पूर्वव
देवहि व्रतादि विष्णुश्च रुद्रश्च सूर्यास्त्याद्यामदर्षयः छंदश्चपरमादेवी गायत्रीसमुदाहृता श्रीरामोदेवताप्रो

राम०
१३

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तु॰कि॰ ५५

दात्मतः व्याप्यत्वव्यापकत्वाच्च विष्णुरित्यभिधीयते सदैकरूपरूपत्वात्सर्वोत्तमत्वादच्युतः अनामयत्वा
द्धीरत्वात् ग्रामस्तित्वात् घृणीत्वतः यथेष्टफलदातृत्वाद्विष्णुरित्यभिधीयते णकारो बलमित्युक्तः षका
रः प्राण उच्यते तयोस्तु संगतिर्यत्र तत्रात्मेत्युच्यते श्रुतेः तस्मात् णकारषकारावनुसंहितमिच्छते स
प्राणं महाबलं चेदं संहितामुत्तमात्मनः तस्यैवायुषमित्युक्तं नेतरस्यैव तत्तु श्रुतेः एतदेव हि विद्याशोधितं
तेयमस्त्वेय एवं वक्ष्यामहे किं भूतमाख्यामहे वयं इमौ णकारषकारावनुसंहितमेव तत् तदेव।
विष्णुस्वात्मेति जिष्णुरित्यभिधीयते विष्णवे नम इत्येष मन्त्रः सर्वफलप्रदः ऐश्वर्यं तु विकारस्यात्तदात्मा
णाद्यं स्मृतः एवं यद्द्वयबीजस्यात् विष्णुमंत्रमनुत्तमम् तल्लक्षणं तं महामनुं जप्त्वा विधानेनाच्युतं गताः

तस्मादेवं महामंत्रं सर्वसिद्धिप्रदं नृप सकृदुच्चारणेनास्य हरिस्तत्र प्रसीदति ब्रह्माद्याः सनकाद्या
श्च मुनयश्च जपन्ति हि छंदस्तु तस्य गायत्री देवता विष्णुरच्युतः स्यादो बीजं नमः शक्तिः मनोरस्य प्र
कीर्तिता ऋषिः पदैः षडंगेषु यथासर्वमसु विन्यसेत् अंगुलीष्वपि चांगेषु मंत्राणि नियथाक्रमात्

षड्भिः स्यहृदये वा ... पृष्ठे गुह्ये यथाक्रमं विन्यस्य च क्रन्यासं च पश्चाद्ध्याने सुखासने पूर्णवेनोन्मु
खीकृत्य हृत्पंकजमधोमुखं विकाशयेच्च मंत्रेण विमलं तत्सकेशरं तस्योपरि च बन्हार्कसोमबिंबा
नि चिंतयेत् तत्र रत्नमयं पीठं तन्मध्ये षट्दलांबुजं तस्मिन् कोटिशशांकाभं सर्वलक्षणलक्षितं चतु
र्भुजं सुंदरांगं युवानं पद्मलोचनं कोटिकंदर्पलावण्यं नीलभ्रूलतिकालकं श्लक्ष्णनासं लसत्कुंडबिंबि
तोज्वलकुंडलं शंखचक्रगदापद्मं दधानं दोर्भिरुज्ज्वलैः केयूरांगदहाराद्यैर्भूषणैश्चंदनैरपि श्लक्ष्ण

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

रा. रह. २४

वामदेवश्च जाबालिरथ कश्यपः मार्कंडेयश्च मौद्गल्यस्तथा पर्वतनारदौ द्वितीयावरणं प्रोक्तं रामस्य परमा
त्मनः धृष्टिर्जयन्तो विजयः सुराष्ट्रो राष्ट्रवर्द्धनः अशोको धर्मपालश्च सुमन्तुश्चाष्टमो गणः तृतीयावरण
तस्य तत्रैवेन्द्रादिदेवताः कुमुदाद्याश्च चंडाद्या विमाने चान्तरीयकाः एवं ध्यात्वा जगन्नाथं पूजयेन्मनसा
पि वा षट्सहस्रं जपेन्मन्त्रं जुहुयाच्च दशांशकं जुहुयाच्च रमणं वापि शतपुष्पाञ्जलिं न्यसेत् एवं संपूज्य
देवेशं यावज्जीवमतन्द्रितः तद्देहपतने तस्य सारूप्यं परमे पदे विद्याश्रीराज्यवित्ताद्यं यं यं कामयते हृदि
नान्यदेवं नमस्कृत्वा सर्वसिद्धिमवाप्नुयात् विना वैष्णवमन्त्रं च अन्यमन्त्रान्विवर्जयेत् तमेव पूज
येद्रामं तन्मन्त्रं वै जपेत्सदा अन्यथा नाशमाप्नोति इह लोके परत्र च अद्वितीयं यथा मन्त्रं तारकं ब्रह्मना
मकं जपित्वा सिद्धिमाप्नोति अन्यथा नाशमाप्नुयात् सावित्रीमन्त्ररत्नं च तथा मन्त्रद्वयं शुभं सर्वमन्त्रज
पेत्पूर्वं संसिद्ध्यर्थं जपेत्सदा अजपेत्तान्महामन्त्रान्मन्त्रसिद्धिमवाप्नुयात् तस्माच्च रामं जपित्वैनं पश्चा
न्मन्त्रं प्रयोजयेत् विद्याश्रीवित्तराज्यादिरूपारोग्यजयार्थिनः पुष्पाञ्जलिं बिल्वरक्ताब्जजाति दूर्वा
कुरस्तथा आरक्तकरवीरैश्च हुत्वा सिद्धिमवाप्नुयात् सर्वसिद्धिमवाप्नोति तिलहोमेन वैष्णवः अष्टोत्त
र सहस्रं वा शतमष्टोत्तरं तु वा सायं प्रातश्च जुहुयात् षण्मासं विजितेन्द्रियः यावज्जीवं जपेद्यस्तु मन्त्रमे
त्मा राममनुस्मरन् सदारः पुत्रपौत्राद्यैर्नरः स्वर्गं महीयते फट्कारयुक्तः स्वाहान्तो रामाख्यः संप्रकीर्तितः
सर्वापत्सु जपेन्मन्त्रं रामं ध्यात्वा महाबलं चौराग्निशत्रुसंवादे तथा रोगभयेषु च तोयजालस्थलादिभ्यो
नयेषु च समन्ततः शंखचक्रांकधनुर्बाणपाणिं सुमहाबलं लक्ष्मणानुचरं राममध्यायेत् ... नाश

24

राम २४

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

त्ताविनियोगोयथारुचिः अंगुलीष्वपिचांगेषुन्यासकर्माथवीजनः मूर्ध्न्यास्येहृदयेपृष्ठेगुह्येचरणयोस्तथा वेश्म
वाप्यगुरोःपंचसंस्कारविधिपूर्वकं अधीत्यमंत्रविधिनापश्चादेतज्जपेद्बुधः ब्राह्मणाःक्षत्रियावैश्याःस्त्रि
यःशूद्रास्तथेतराः मंत्राधिकारिणःसर्वेह्यनन्यशरणायदि स्नानादिकंततःकृत्वासन्तुष्टःपुण्ड्रपवित्रध
कृ कृष्णासनेसुखासीनःप्राणायामांश्चन्यासकृत् ध्यायेत्कमलपत्राक्षंजानकीसहितंहरिं नैवध्याने
प्रकुर्वीतविग्रहेसात्तसाङ्गिणः चंदनागरुकर्पूरवासितेरत्नमंडले तन्मध्येकल्पवृक्षस्यछायायांपर
मासने नानारत्नमयेदिव्येसौवर्णेसुमनोहरे तस्मिन्नवालार्कसंकाशेपंकजेऽष्टदलेशुभे वीरासनेसमासीनंवामांके
स्थितसीतया सुस्निग्धशाड्वलश्यामंकोटिवैश्वानरप्रभं युवानंपद्मनयनंकंबुग्रीवंमहाहनुं विशालवक्षसंरक्त
हस्तपादतलेशुभे वंधूकद्युतिसंकाशस्निग्धोष्ठद्वयशोभितं पूर्णचंद्राननंस्निग्धभ्रूयुगंघननासिकं स्मेरोद्धय
मानीलकुंतलासितसुंदरं तरुणादित्यसंकाशकुंडलाभ्यांविराजितं हारकेयूरकटकैरंगुलीयैश्चभूषणैः
श्रीवत्सकौस्तुभाभ्यांचवैजयंत्याविभूषितं हरिचंदनलिप्तांगंकस्तूरीतिलकांचितं शंखचक्रधनुर्वाणान्
विभ्राणंदोर्भिरायतैः वामांकेसुस्थितांदेवींतस्यकांचनसन्निभांपद्मां श्रीपद्मवदनांनीलकुंचितमूर्धजांसि
तस्कंधेसुस्पष्टांकेयूरकटिसुलोचनांतरुणादित्यसंकाशपुनांदंतदर्पमंडितांआरूढयौवनांनित्यांपीनोन्न
तपयोधरां दुकूलवस्त्रसंवीतांभूषणैरुपशोभितां भजतांकामदांपद्महस्तांसीतांविचिंतयेत् लक्ष्मणं
पश्चिमेभागेधृतछत्रंमहाबलं पार्श्वेभरतशत्रुघ्नौवालव्यजनपाणिनौ अग्रतस्तुहनुमंतंबद्धांजलिपु
टंतथा सुग्रीवंजांबुवंतंचसुषेणंचविभीषणं नीलंनलंचांगदंचऋषभादिंसुपूजयेत् वसिष्ठो।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

समासीनस्तु कुर्वीत प्राणायामं पूर्ववत् आदिबीजेन कुर्वीत षडंगं च यथाक्रमं अंगुलीष्वपि तत्तेन
न्यासकर्म समाचरेत् मुखे वा कोष्ठ हृदये करे। जान्वोश्च पादयोः विन्यस्य मंत्रवर्णानि चक्रान्यासं ततः स्म
तः पूर्ववन्मुकुटादीन्स्मरेदाभरणानि च विचित्र शुभ पर्यंके दिव्यकल्पतरोरधः सुगंधपुष्पसंकी
र्णे सर्वतः सुविचित्रते तस्मिन्देव्या समासीनं रुक्मिण्या रुक्मवर्णया नीलोत्पलाभं कंदर्पवर्णपद्मलो
चनं चंद्राननं जयापुष्परक्तहस्तपदांबुजं नीलकुंचितकेशं च सुकपोलं सुनासिकं सुभ्रूयुगं
सुबिंबोष्ठं दंतावलिविराजितं उन्नतांसं दीर्घबाहुं पीनवक्षसमुच्चयं निरंकचंद्रनखरं सर्व
लक्षणलक्षितं श्रीवत्सकौस्तुभोद्भासि वनमालान्तरोरसं पीतांबरं चारु बाहुं बालार्काभसुकुंड
लं हारकेयूरकटकैरंगुलीयैश्च शोभितं मौक्तिकान्वितनासाग्रं कस्तूरीतिलकान्वितं हरिचंद
नलिप्तांगं सदैवारुदयौवनं मंदारपारिजातादिकुसुमैः कबरीकृतं अनर्घ्यमुक्ताहारैश्च तुलसी
वनमालया शंखचक्रसमेताभ्यां भुजाभ्यां विराजितं इतराभ्यां तथा देवी समाश्लिष्टं निरंतरं अ
लंकृताभिः सत्यादि महर्षिभिः समावृतं कालिंदी सत्यभामा च मित्रविंदा च नाग्निजित् सुनंदा
च सुशीला च जांबवती सुलक्षणा एता महिष्यः संप्रोक्ताः कृष्णस्य परमात्मनः ताभिश्च राज
कन्यानां सहस्रैः परिसेविसेतं अनर्घ्यमुक्ताहारैश्च दिव्याभरणभूषितं तारकान्तरराजेव शो
भितं निधिभिर्वृतं एवं ध्यात्वा हरिं नित्यं प्रपूज्य पित्वा जपेन्मनुं शालग्रामे च तुलसीवने वा
स्थंडिले हृदि सत्वा जपेत्रिसंध्यासु षड्दृक्समनु द्विजः विष्णुतुल्यो व[illegible]विष्णुलोक



CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ने सहस्रेतु जपेन्मंत्रं सर्वपापैर्विमुच्यते सूर्योदये यथा नाशमुपैति ध्वांतमाशुनः तथैव स्मरणादि
नाशयात्युपद्रवाः एवं श्रीराममंत्रस्य विधानं जायते नय विधानं कृष्णमंत्रस्य वक्ष्यामि शृणु यार्थि
व श्रीकृष्णायनमो ह्येष मंत्रः सर्वार्थसाधकः कृष्णेति मंगलं नाम यस्य वाचा प्रवर्तते भस्मी भवंति रा
जेंद्र महापातककोटयः सकृत्कृष्णेति यो ब्रूयाद भक्त्या वापि मानवः पापकोटिविनिर्मुक्तो विष्णुलोक
मवाप्नुयात् अश्वमेधसहस्राणि राजसूयशतानि च भक्त्या कृष्णमनुं जप्त्वा समाप्नोति न संशयः गा
वा च कन्यकानां च ग्रामाणां चायुतानि च दत्वा गोदावरी कृष्णा यमुना च सरस्वती कावेरी चंद्रभागा
दि स्नानं कृष्णेति नो समं कृष्णेति पंचकं जप्त्वा सर्वतीर्थफलं भवेत् कोटिजन्मार्जितं पापं ज्ञानतो ज्ञा
नतः कृतं भक्त्या कृष्णमनुं जप्त्वा दहते तूलराशिवत् अगम्यागमनात्पापाद भक्ष्याणां च भक्षणात् स
कृत्कृष्णमनुं जप्त्वा मुच्यते नात्र संशयः कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः उभयोः संगतिर्ये
न तद्ब्रह्मेत्यभिधीयते णकारश्चाथकारश्च बलप्राणौ भौम्मतौ आभ्यां यतो समायुक्तो जगतोस्य पितृत्व
तः तस्मात्कृष्णेति मंत्रोयं वाचकः परमात्मनः कृष्णेति परमो मंत्रः सर्ववेदादिकः स्मृतः श्रियः सत्त्वप्र
णवत्वाल्लक्ष्मीकृष्णमशीतवे स्मृतः एवं मंत्रं विदित्वैव पश्चान्मंत्रं जपेद्बुधः सर्वकामप्रदत्वाच्च वीजं कांदर्प
मुच्यते नित्यानपायाच्छ्रीशक्तिर्मंत्रोस्य प्रयुज्यते देवर्षिनारदस्तस्य गायत्री छंद उच्यते देवता रु
क्मिणीभर्ता कृष्णः सर्वफलप्रदः पूर्ववद्विधिना मंत्रं गृहीत्वा लेख्यवाञ्शुचिः स्नानवस्त्रादिभिः शुद्धः कृ
त्यं कृत्वा ह्यूर्ध्वपुंड्रधृक् तुलसीकानने रम्ये देवानामालये शुभे कुशीकृष्णाजिने वापि पुण्ये वा शुभवासरे

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

रा॰ १६ मेद्ध्रुवमपल्वंततोविष्णुपुरंव्रजेत् नमोयज्ञवराहायइत्यष्टाक्षरकोमनुः उक्तबीजत्रयंपूर्वंकृत्वा
मंत्रंजपेद्बुधः मूलमंत्रमिदंप्राहुर्वाराहंमुनिपुंगवाः एतमेवपरंमंत्रंजप्त्वाभूमिपतिर्भवेत् नित्यम
ष्टसहस्रंतुजपेद्विष्णुंविचिंतयेत् कमलैर्बिल्वपत्रैर्वाजुहुयाच्चदशांशकं एवंसंवत्सरंजप्त्वासार्वभौ
मोभवेद्ध्रुवं राज्यंकृत्वाचधर्मेणपश्चाद्विष्णुपदंव्रजेत् विधानंनारसिंहस्यमंत्रोर्वक्ष्यामिसुव्रत उ
ग्रवीरंमहाविष्णुंज्वलंतंसर्वतोमुखं नृसिंहंभीषणंभद्रंमृत्युमृत्युंनमाम्यहं ऋषिर्ब्रह्मानुष्टुप्छंदो
देवताचनृकेशरी चतुर्थश्चतुरक्षरश्चपदश्चतुष्पदाक्रमात् शिरोललाटनेत्रेषुमुखबाहुंघ्रिसंधि
षु नाभ्यासांगेषुकुक्षौहृदयेगलेपार्श्वयोःपुच्छ अपरांगेककुदोश्चन्यसेद्वर्णाननुक्रमात् अथोदशाक्ष
२६ रंपदस्यसहोकारसरेफकं कृत् बिंदुनासहितपञ्चनासिकं हुंफट्स्वाहा अंगुलीषुतथांगेषुन्यासंतेनैव
चोदितं तद्बीजमादितःकृत्वामंत्रंपश्चात्प्रजपेत् नमोभगवतेनरसिंहायज्वालामालिने दी
प्तदंष्ट्रायाग्निनेत्रायसर्वरक्षोघ्नायसर्वभूतविनाशायसर्वज्वरविनाशायदहदहपचपचरक्षरक्ष
हुंफट्स्वाहा इतिज्वालामालीपातालनृसिंहायनमः बीजेनैवन्यासः ॐ ह्रीं क्ष्रौं क्रौं हुं फट् अ
स्यमंत्रस्यब्रह्माऋषिःपंक्तिश्छंदोनृसिंहोदेवतानृसिंहाक्षमिदंबीजेनैवन्यासः श्रीकारपूर्वो
नृसिंहोद्विजेयादुपरिस्थितः त्रिःसप्तकबीजस्यात्मनाभयनिवारणे अस्यब्रह्माचरुद्रश्च
प्रह्लादश्चमहर्षयः तथैवजगतीछंदोदेवताचनृकेसरी न्यासंबीजेनकुर्वीत ततोध्याने राम १६

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

मवाप्नुयात् सर्वसिद्धिमवाप्नोतीह लोके परत्र च विद्यार्थी नारायणं तं जपेद्ध्यायन् ऋतुत्रयं जुहुयात्कुसुमै
र्मुख्यैः विद्यासिद्धिमवाप्नुयात् आयुःकामी तु पूर्वाह्णे वत्सरं प्रयुतं जपेत् ध्यायेच्छ्रुतं तं कृष्णं तिलैर्हुत्वायुराप्नु
यात् कन्यार्थी तु जप्त्वायं षोडशाब्दीयुतं हरिं ध्यात्वा सहस्रं जुहुयादाज्यैर्मधुविमिश्रितैः स्त्रियं लभेताभिमतां
रूपौदार्यवतीं सतीं संपत्कामी जपेन्नित्यं मध्याह्ने तु ऋतुत्रयं द्वारकायां सुधर्मायां रत्नसिंहासने स्थितं श्री
रथ्चकादिनिधिभी राजकुलैरपि सेवितं हारादिभूषणैर्युक्तं शंखचक्रायुधधारिणं ध्यात्वा संप्रजपेल्लक्षं जपप्रा
युतसंख्यया अब्जविल्वदलैर्वापि सोमो मधुविमिश्रितैः शाश्वतीं श्रियमाप्नोति कुबेरसदृशो भवेत् रूप
लावण्यकामी तु रासमण्डलमध्यगं ध्यायंस्त्रिमासमयुतं जप्त्वा लावण्यवान्भवेत् एवं कामं मनोरम्यमाद्यात्मयं परि
कीर्तितं अनंतान् भगवन्मंत्रान् वक्तुं शक्ना न ते मया वाराहं नारसिंहं च वामनं तुरगाननं क्रमेणैव तु वक्ष्यामि
यथावद्धृणु पार्थिव हुंकारं प्रथमं बीजं आद्यं वाराहमुच्यते पश्चात्तु धरणीबीजं लक्ष्मीबीजं ततः परं त्रीन्।
बीजानादितः कृत्वा पश्चान्मंत्रप्रयोजनं ॐ नमो भगवते च पश्चाद्वराहरूपिणे भूर्भुवःसुवःपतये ति भूप
तित्वं मे देहि ददापय दापय स्वाहेति चांगुलीषु यथायोगं तु बीजेनाद्येन वै क्रमात् यथा सन्यासं कृत्वा
पश्चाद्ध्यानं समाचरेत् कृतत्तु कृतजीवन्मदंष्ट्रसुशोभनं समस्तवेदवेदाङ्गसाङ्गोपाङ्गयुतं हरिं रज
ताद्रिसमपुख्यं शतबाहुं शतेक्षणं उद्धृत्य दंष्ट्रया भूमिं समालिंग्य भुजे मुदा ब्रह्मादिभिर्दैवैः सर्वैः शौनका
द्यैर्मुनीश्वरैः स्तूयमानं समंताच्च गीयमानं च किन्नरैः एवं ध्यात्वा हरिं नित्यं प्रातरष्टोत्तरशतं जप्त्वा ल

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

त्रा० १७

तैः सर्वसिद्धिमवाप्नोति षण्मासात्प्रयतो भवेत् देवत्वममरेशत्वं गांधर्वत्वं तथा नप प्राप्नुवंति नरा राज्यं स्व
र्गमोक्षं च दुर्लभं यं यं कामयते चित्ते तं तमेवाप्नुयात्ध्रुवं ब्रह्मर्षिर्गायत्री छंदः श्रीनृसिंहो देवता तद्देवबी
जशक्तिः श्रीमनोरस्य विधीयते न्यासमाद्येन बीजेन ख्यातेन तु ष्टलसीदले पूर्वोक्तविधिना पीठे पूजयित्वा स
माहितः परितः पूजयेद्विद्युग्गरुडं शंकरं तथा शेषं च नंदिनं चैव श्रियं मायां धृतिं तथा पुष्टिं समर्चयेद्दिक्षु त
तो लोकेश्वरान्यजेत् महाभागवतं दैत्यनाथं प्रह्लादमग्रतः एवं संपूज्य देवेशं नारसिंहं सनातनं तत्प
दं समवाप्नोति मुदितः स्वजनैः सह कर्पूरधवलं देवं दिव्यकुंडलभूषितं किरीटकेयूरधरं पीतांबरधरं प्र
भुं पद्मासनस्थं देवेशं चंद्रमंडलमध्यगं सूर्यकोटिप्रतीकाशं पूर्णचंद्रनिभाननं मेखलाजिनदंडादिधा
17 रिणं षट्करूपिणं कलधौतमयं पात्रं दध्यन्नेन सुपूजितं विभ्रतं कलशं वामे दधानं द्विभुजं हरिं सनकाद्यैः
स्तूयमानं सर्वदेवैरुपासितं एवं ध्यात्वा जपेन्नित्यमासने च समाहितः विष्णवे वामनायेति प्रणवादिनतो
तकं इंद्रऋषिश्च विराट् छंदो देवता वामनस्वयं सुधाबीजं सुदीर्घं तु बीजमाद्यं तु वामने तेनैव तु षडंगानि न्या
सं कुर्वीत वैष्णवः दध्यन्नं पायसं वापि जुहुयात्प्रत्यहं द्विजः श्रोपासनाग्नौ जुहुयाद्वशी तु ह्रस्वतेजसा कु
वेरसदृशः श्रीमान्भवेत्सद्योन संशयः ॐ नमो विष्णवे महाबलाय स्वाहा इति वामनमंत्रः सप्तवारं त्रिविक्र
मरूपं जपेन्मंत्रमनन्यधीः मुक्तो वधान्नवेत्सद्यो नात्र कार्या विचारणा ह्रीं श्रीं श्रीं वामनाय नमः इति मू
लमंत्रः ब्रह्मर्षिश्चैव गायत्री देवता च त्रिविक्रमः न्यासं बीजेन जपवान्सप्तशीतरसहस्रकं इति वामन

राम १७

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

न्यपोत्तमः माणिक्यादिसमप्रभं निजरुचा संत्रस्तरक्षोगणं जानुन्यस्तकरांबुजं त्रिनयनं रत्नोल्लसद्भूषणं बा
हुभ्यां धृतशंखचक्रमनिशं दंष्ट्राग्रवक्त्रोल्लसज्ज्वालाजिह्वमुदग्रकेशनिचयं वंदे नृसिंहं प्रभुं उद्यत्कोटिसम
प्रभं नरहरिं कोटीदुर हारोज्ज्वलं दंष्ट्राभीममुखोज्ज्वलं नखमुखैर्दीर्घैरनेकैर्भुजैः निर्भिन्नासुरनायकं तु
शराभस्तूर्याग्निनेत्रत्रयं विघ्नोज्झिह्वासदाकलापभयदं वंदे वदंतं भजे कोपादालोलजिह्वं विवृतनिजमु
खं सोमसूर्याग्निनेत्रं पादादानाभिमेशक्रप्रभमुपरि सितं भिन्नदैत्येंद्रगात्रं चक्रं शंखं सपाशांकुशमुशलगदा
शार्ङ्गबाणान्वहंतं भीमं तीक्ष्णाग्रदंष्ट्रं मणिमयविविधाकल्पमीडे नृसिंहं महाभयेभ्यो ध्यानं सौम्यमभ्युद
येषु सौवर्णाभिमंडपांतस्थपद्मध्यायत्सकेशरसकर्णिके दीरष्टैवरष्टभिः परिशोभिते पंचास्यं चबलं
भीमं सोमसूर्याग्निलोचनं तरुणादित्यसंकाशं कुंडलाभ्यां विराजितं चांपेयकाशसुमुखं तीक्ष्णदंष्ट्रावि
राजितं व्यात्तास्यमरुणौष्ठं चानीलवर्णाभीवरोपेतं सिंहस्कंधानुरूपां सहस्तायतचतुर्भुजं जपासमाभ्रिद
स्ताज्वपद्मासनसुसंस्थितं श्रीवत्सकौस्तुभोरस्कं वनमालाविराजितं केयूरांगदहाराढ्यं नूपुराभ्यां विरा
जितं चक्रशंखाभयवरदं चतुर्हस्तं विभुं स्मरेत् वामांकेसंस्थितां लक्ष्मीं सुंदरीं भूषणान्वितां दिव्यचंदन
लिप्तांगीं दिव्यपुष्पोपशोभितां गृहीतपद्मयुगलमातुलिंगकरांबुचितां एवं देवीं नृसिंहस्य वामांकोप
रिसंस्थितां ध्यात्वा जपेन्मनुं नित्यं पूजयेच्च यथाविधि ह्रौं ह्रीं श्रीं श्रीं नृसिंहाय नमः इमं लक्ष्मीनृसिंह
स्य जपेत्सर्वार्थदं मनुं अष्टोत्तरसहस्रं वा जपेत्सं ध्यासु वाग्यतः अखंडबिल्वपत्रैश्च जुहुयादाज्यमिश्रि

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ह्रा०
१८

ऽष्टाक्षरं इति सुदर्शनाभिधाने श्रीलक्ष्मीहारीतस्मृतौ विशिष्टपरमधर्मशास्त्रे भगवन्मंत्रविधानं नाम तृतीयोऽध्याय
३ हारीत उवाच अथ वक्ष्यामि राजेंद्र विष्णोराराधनं परं पुंसां हितसौख्याय सम्यगाचस्यवारिणा १ आत्मानं दे
हमीशाच चिंतनस्स जितेंद्रियः ज्ञानानंदमयो नित्यो निर्विकारो निरामयः देहेंद्रियात्परः साक्षात्स च विशालको ह्ययं
अस्मिन् देहे वसाम्यद्य शेषभूतो हि शार्ङ्गिणः शुक्रशोणितसंभूते जरारोगाद्युपद्रुते मेदोरक्तास्थिमांसादिदेहे यद्व
समाकुले मलमूत्रवशापके नानादुःखसमाकुले तापत्रयमहावह्निदह्यमाने निशं भृशं इषणात्रयपंकस्माहि
पीड्यमाने दुरत्यये क्लिश्यामि पापभूयिष्ठे कारागृहे निमेसुचौ बहुजन्मबहुक्लेशगर्भवासादिदुःखिते वसामि
सर्वशेषाणामालये दुःखभाजने अस्माद्विमोक्षणार्थाय चिंतयिष्यामि केशवं वैकुंठे परमे व्योम्नि दुग्धाब्धौ वैष्णवे
पदे अनंतभोगिपर्यंके समासीनं श्रियासह इंद्रनीलनिभं श्यामं शंखचक्रगदाधरं पीतांबरधरं देवं पद्मपत्र
पत्रेक्षणं श्रीवत्सकौस्तुभोरस्कं सर्वाभरणभूषितं चिंतयित्वा नमस्कृत्वा कीर्तयेद्दिव्यनामभिः संकीर्त्य नाम
सांतस्तं नमस्कृत्वा गुरूनपि तुलसीकांचने गां च सस्पृश्याथ समाहितः दूरादावासविनिष्क्रम्य शुचौ देशे च निर्जने
कर्णस्थब्रह्मसूत्रस्तु शिरःप्रावृतवाससा कुर्यान्मूत्रपुरीषे च शब्दं नोच्छ्वासवर्जितः अहन्युदङ्मुखो रात्रौ दक्षि
णाभिमुखस्तथा समाहितमना मौनी विण्मूत्रे विसृजेत्ततः उत्थाय ततः शौचं कुर्याद्युद्धृतैर्जलैः गंधलेपक्षय
करं यथासंख्यं मृदा शुचिः अर्द्धप्रसृतिमात्रं तु मृदं दद्याद्यथोक्तवत् षडपाने त्रिर्लिंगे तु सव्ये तस्मिंस्तथा दश उभ
यो सप्तदातव्या स्निग्धस्निग्धस्तु पादयोः आजंघान्मणिबंधात्तु प्रक्षाल्य सुमनाचारणः उपविश्य शुचौ देशे अंतर्जा

78

राम०
१८

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

मंत्रस्यजपाद्वन्नपतिर्भवेत् उद्गीथप्रणवोद्गीथसर्ववागीश्वरेश्वरं सर्ववेदमयाचिंत्यंसर्वंबोधयमंयमेपिले
हुंरैंवेहृयग्रीवायनमः ब्रह्मार्षिश्छंदोनगायत्रीत्स्यग्रीवोदेवता न्यासंबीजेनकृत्वाथपश्चाद्ध्यानंसमाच
रेत् शरच्छशांकप्रभश्चवक्रं मुक्तामयैराभरणैरुपेतं रथांगशंखांचितवाहुयुग्मंयानुद्वयन्यस्तकरंम
जामः शंखाभंशंखचक्रीकरस्थंस्मिजयोः पुस्तकंचान्यतस्तोविभ्रद्व्याख्यानमुद्रंसुभवितरकरोमंगलस्यः।
सुधांसोः आसीनःपुंडरीकेतुरगवरशिरःपुरुषोमेपुरस्तात् श्रीमानज्ञानदारीमनसिनिवसतामंगयपुसा
मरूपः एवंध्यात्वाजपेन्मंत्रसंध्यासुविजितेंद्रियः सर्ववेदार्थतत्त्वज्ञोभवेदत्रनसंशयः अष्टोत्तरसहस्रं।
वाशतमष्टोत्तरंतुवाः जपेद्यजुष्यांद्वैवसाज्यैःशुभैः जैसतदलैः विद्यासिद्धिमवाप्नोतिषण्मासाद्द्विजस
त्तमः अष्टादशानांविद्यानांवृहस्पतिसमोभवत् सहस्रारंहुंफाडित्येवंमूलंसौदर्शनंमनं श्रीहंबुध्न्योनुष्टु
पस्यदेवताचसुदर्शनं आचक्रायसुचक्रायतथैवचक्रायच विचक्रायसुचक्रायज्वालाचक्रायवैक्रमात्
षडंगेषुचविन्यस्यपश्चाद्ध्यानंसमाचरेत् नमश्चक्रायस्वाहेतिदशदिक्षुयथाक्रमं चक्रेणसंवध्नातील्फ
काप्रांतोदिशंततः त्रैलोक्यरक्षरक्षहुंफट्स्वाहेतिवैक्रमात् अग्निप्राकारमंत्रोयंसर्वरक्षाकरंपरं ॐमूर्द्धि
सन्नमध्येस्मुरेवस्नाह्वदीत्यतः रंग्रहृक्रुंतुजान्वोश्चफट्पदद्वयसंधिषुकल्पातार्कप्रकाशंत्रिभुवनमखि
लंतेजसापूरयंतं रक्ताक्षंपिंगकेशंरपुकुलभयदंभीमदंष्ट्राट्टहासं शंखंचक्रंगदाब्जंपृथुतरमुशलंचापप
शांकुशाद्यं विभ्राणंदोर्भिराद्यंमनसिजरिपुंभावयेच्चक्रसंज्ञं ॐनमोभगवतेमहासुदर्शनायहुंफट् इतिबी

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

रा० १९

वः श्रीकामतुलसीमूलमृदा वापि प्रयत्नतः नेत्रैणैवानिमज्याथ ललाटादिषु धारयेत् नासिकामूलतो
रम्यं विभयात् ऊर्ध्वपदाकृतिं सांतरालं भवेत्पुंड्रं दंडाकारं तु वा यथा ललाटे धारयेत्तस्माज्जीवांतं केशवादि
भिः नाम्नाद्वादशभिर्मूर्ध्नि वासुदेवं तु नामुना पवित्रपाणिः शुद्धात्मा सोऽध्यां कुर्यात्समाहितः प्रादेशमात्रौ
कौशेयौ साग्रौ मूलयुतौ तथा सांतर्गर्भौ सुविमलौ पवित्रे कारयेद्द्विजः देवार्चने जपे होमे कुर्याद्भाल्ये पवित्रकं
सूत्रैरेव तु तैलं ग्रंथिरेवं धर्मो विधीयते छिन्नदर्भाश्रिता दर्भा ये ह्नीयं तं भूमिषु स्तरणासनपिंडेषु त्यजेच्च त
र्पणे पानभोजनकाले च धृतान् दर्भान् विसर्जयेत् सपवित्रकरेणैव आचमनेन प्रयतो द्विजः आचांतस्य शुचिः
पाणिर्यथा पवित्रस्तथा कुशः संध्याचमनकाले तु धृतं न परिवर्जयेत् अप्रशस्तास्मृता दर्भाः प्रशस्तास्त्व कुशा
79 स्मृताः समूलास्तु कुशा ज्ञेया छिन्नाग्रास्तृणसंज्ञिकाः सकुशोदकेन यत्कंठं नित्यं संशोधयेद्द्विज नपर्युषित
पापानि ब्रह्मकूर्चं दिने दिने कुशासने सदा पूतं जपहोमार्चनादिषु कुशैनैव हि कलं कर्म सर्वमानंत्यमश्नु
ते तस्मात्कुशपवित्रेण संध्यां कुर्याद्यथाविधि अनंतविष्णोर्गोत्रादि देवतानामुपक्रमात् तुलसीबिल्वपत्रा
णि दूर्वा कौशेय एव विष्णुक्रांता मरुवकं नालिजावं च पाटलं कुबेरवेलु दमनाकेशरं चंदनं तथा उसीरं।
जातिकुसुमं कुंदं चैव कुरवकं। शतीपुष्पं कदंबं च चूतपुष्पं च माधवी बिल्वस्य प्रवालानि जावं पाटलं
तथा आस्फोटं कुरजं लोध्रं कार्णिकारं च किंशुकं नीवीजं नेशिंशुपं श्वेतकं सुक्रांतनामकं जंबीरं मातु
लिंगं च पृथिकार्स्च व तथा पुन्नागं बकुलं नागकेशराशोक मल्लिका शतपत्रं च हरिद्रं कौंबीरप्रियंगु च। रा० १९



CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

नुकरस्तथा पवित्रपाणिराचामेत्सुसातिस्थेनवारिणा [illegible] त्रिः प्राश्यांगुष्ठमूलेन द्विरुन्मृज्य कपोलौ
मध्यमांगुलिभिः पश्चात् द्विरोष्ठं च मृजेत्तथा नासिकोष्ठांतरं पश्चात्सर्वांगुलिभिरेव च पादौ संस्तौ शिरश्चैव जलैः
संमार्जयेत्ततः अंगुष्ठतर्जनीभ्यां तु स्पृशेत् नासिकापुटौ अंगुष्ठानामिकाभ्यां तु चक्षुःश्रोत्रे जलैः स्पृशेत् कनि
ष्ठांगुष्ठेसनाभितलेन हृदयं ततः सर्वांगुलिभिः शिरसि बाहुमूले तथैव च नामभिः केशवाद्यैश्च यथास्
थानमुपस्पृशेत् द्विराचामित्तु सर्वत्र विण्मूत्रोत्सर्जने त्र्यं सामान्यमेतत्सर्वेषां शौचं तु द्विगुणोदितं आ
चामपातः परं मौनी दंतान् काष्ठेन शोधयेत् प्राङ्मुखोदङ्मुखो वापि कषायं तिक्तकंटकं कनिष्ठाग्रमितं
स्थूलं द्वादशांगुलमायतं पर्वाग्रकृतकूर्चं न नतेन दंतानि कर्षयेत् अग्नौ द्वादशगंडूषैर्वक्त्रं संशोधयेत् द्वि
जः मुखं संमार्जयित्वाथ पश्चादाचमनं चरेत् पवित्रपाणिराचम्य पश्चात्स्नानं समाचरेत् नद्यां तटाके
मौले वा तथा प्रस्रवणोज्जले तुलसीमृत्तिकाधात्रीउपलिप्य कलेवरे अभिमंत्र्य जलं पश्चान्मूलमंत्रेण
वैष्णवः निमज्ज्य तुलसीमिश्रं जलं संप्राशयेत्ततः आचम्य मार्जनं कुर्यात् कुशैः सतुलसीदलैः पौरुषेण
तु सूक्तेन आपो हि ष्ठादिभिस्तथा निमज्ज्यादौ जपेत्पश्चात्त्रिवारमघमर्षणं उत्थाय पुनराचम्य पश्चाद
प्सु निमज्ज्य वै मंत्ररत्नं त्रिवारं तु जपेत् ध्यायन् सनातनं पिबेदुत्थाय तेनैव त्रिवारमभिमंत्रितं आच
म्य तर्पयेद्देवान् पितॄन् पितृविधानतः निष्पीड्य कूले वस्त्रं तु पुनराचमनं चरेत् धौतवस्त्रे चोत्तरीय
स्त्रे कौपीनं धारयेत्सुधीः निबद्धशिखकच्छोऽसौ द्विराचम्य यथाविधिः धारयेदूर्ध्वपुंड्राणि मृदा शुभ्रेण वैष्ण

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ल॰ २० वासुवर्णे वा कौशेयं वा विनिक्षिपेत् दर्शयेत्सुरभेर्मुद्रां पूजयेत्कुसुमाक्षतैः अभिमंत्र्य च मंत्रेण धूपदीपैर्निवेद
येत् दर्भाग्निचयेरौष्णाणितानकांस्यान्प्रयोजयेत् अनंतरं चोत्तरेण पादं दद्यात्पाद्यादिकं तथा तत्पात्रक्षालनं कृत्वात
त्पापुष्पांजलिं न्यसेत् सौवर्णान्निचयेरौप्याणि सताम्रांकांस्यान्प्रयोजयेत् पात्राण्यनप्यलाभे तु शंखमेकं विशि
ष्यते शंखोदकं सदा पूतमतिप्रियतमं हरेः उद्धरीण्या जलं दद्यान्नाप्सु शंखं निमज्जयेत् अष्टाक्षरेण मनुना
मंत्ररत्नेन वाजयेत् पाद्यार्घ्याचमनं दत्वा मधुपर्कं निवेदयेत् पुनराचमनं दत्वा पादपीठं निवेदयेत् तं दंतधा
वनगंडूषदर्पणालोचनं तथा निवेद्याभ्यंजनं गंधतैलेनोद्वर्तनं रंजनं सुखोष्णाच्छजलैः स्नानं पुनरुद्वर्तनं च
रेत् कुंकुमेन सारिद्रेण चंदनेन सुगंधिना उद्वर्त्य गंधतोयेन स्नापयेच्च पुनस्ततः स्नानपात्रोदकं पश्चाद्द
२० द्यात्कुसुमैः सह पौरुषेणानुसूक्तेन स्नापयेत्कमलापतिं मार्जयेच्छुभवस्त्रेण दीपैर्नीराजयेत्ततः वस्त्रं
चैवोपवीतं च दद्यादाभरणानि च कस्तूरीतिलकं गंधपुष्पाणि सुरभीणि च अंगे निवेश्य देवस्य लक्ष्मीं संपूजये
त्तथा पार्श्वयोर्धरणीं लीलां महिष्यः परितस्तथा विमलोत्कर्षिण्याद्याः पूर्वमेव प्रकीर्तिताः चंडादिद्वारपा
लांश्च कुमुदादींस्तथार्चयेत् तथैवावरणाधीशाः पूजनीयाः सतंततः वासुदेवः शीरपाणिः प्रद्युम्नश्चउषाप
तिः दिक्षु कोणेषु तत्पत्न्यो लक्ष्मीरेवा रती उषा द्वितीयावरणे पश्चात्केशवाद्यास्सशक्तयः संकर्षणादयः पश्चा
त्तस्यक्रमादयस्तथा श्रीलक्ष्मीकमलापद्मापद्मिनीकमलालया रमाहंसवाकपद्मिन्यापृथ्वीयज्ञालयेंदि
रा शक्तयः केशवादीनां संप्रोक्ताः परमे पदे हिरण्या हरिणी नद्या नित्यानंदा त्रयी सुरम्या सुगंधा सुंदरी विद्या राम॰ २०

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

नीलोत्पलंसद्दलाच्चसंभावर्तेचकैतकं घटंजंस्थलपद्मंचसर्वाणिजलजानिच तत्कालेनद्भुपुष्पाणिगृहीत्वाप्र
विशेत् वितानादियुतेदिव्येधूपदीपैर्विराजिते चंदनागरुकस्तूरीकर्पूरामोदवासिते विचित्ररंगवल्याढ्ये
मंडपेरत्नपीठके विस्तीर्णपुष्पपर्यंकेदेव्यासहितमच्युतं सन्निधायासनेस्थित्वाकुशेपद्मासनेस्थितः प्रा
णायामविधानेनभूतशुद्धिंविधायच प्राणायामत्रयंकृत्वापश्चाद्ध्यानंयथोक्तवत् परव्योम्निस्थितंदेवंल
क्ष्मीनारायणंस्तरं परितःशक्तिभिर्युक्तंभूनीलालीलाविमलादिभिः अनंतविहगाधीशसेनान्याद्यैर्गुरोत्तमैः।
चंडाद्यैःकुमुदाद्यैश्चलोकपालैश्चसेवितं चतुर्भुजंसुंदरांगंनानारत्नविभूषणं वामांकस्थश्रियायुक्तंशंखच
क्रगदाधरं मंत्ररत्नविधानेनन्यासमुद्रादिकंमंकृत्वा पंचोपनिषदन्यासंकुर्यात्सर्वत्रकर्मसु ॐवांनमःपरा
येतिपरमेष्ठ्यात्मनेनमः ॐयांनमःपरायेतिततःपुरुषात्मनेनमः ॐरांनमःपरायेतिततोविश्वात्मनेनमः।
ॐवांनमःपरायेतिस्यान्निवृत्यात्मनेनमः ॐलांनमःपरायेतिततःसर्वात्मनेनमः शिरोनासास्यहृदयगु
ह्यपादेषुविन्यसेत् यथाक्रमेणतत्मंत्रान्पंचांगेषुक्रमान्न्यसेत् तन्मुद्रयातयावाह्यदद्यादासनमेवच
पाद्यार्घ्याचमनस्नानपात्राणिस्थाप्यपूजयेत् पूरयित्वाशुभजलंपात्रेषुकुसुमैर्युतं द्रव्याणिनिक्षिपेत्तेषुमं
गल्यानियथाक्रमात् उशीरंचंदनंकुष्ठंपाद्यपात्रेविनिक्षिपेत् विष्णुक्रांतांचदूर्वांचकौशेयंतिलसर्षपा
न् अक्षतांश्चफलंपुष्पमर्घ्यपात्रेविनिक्षिपेत् जातीफलंचकर्पूरमेलांचाचमनीयके मकरंदंप्रवालंच
रत्नसौवर्णमेवच तानिदद्यात्स्नानपात्रेधात्रीमुरतरंतथा द्रव्याणामप्यलाभेतुतुलसीपत्रमेववत चंदनं

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

रा॰
२१

नाहिंगुंचगुग्गुलं छत्राकंमल्लकंशिग्रुंकरंजलशुनंतथा कुंभीदलंचपिण्याकंश्वेतवृंताकमेवच आत्रंचना
लिकाशाकंनारिकेलाख्यमेवच पीलंचस्त्रनापुष्पंचभूस्तृणंभौतिकंतथा कोशातकींबिंबफलंमद्यमांससमा
निच निर्यासामस्याण्यशेषाणिवर्जयेद्यत्नकर्मसु कलिंगकतकंबिल्वफलंजंतुफलंतथा वंशांकुरमला
बूंचतालंहिंतालकंफलं अश्वत्थप्लक्षनीपंचवटमारग्वधंतथा कलंविकाचनिर्गुंडीगुडीवार्ताकमेवच
उष्रंलवणंचैवश्वेतंचवृहतीफलं नखंचमांतकंचैवचिंचिलंचैवतियत्नतः छिन्नायेमान्यनक्षमानिवर्ज्जयेद्य
त्नकर्मणि श्लेष्मातकंचविंवानिपृत्यक्षलवणंतथा आर्तहशाहगोक्षीरमवत्सायास्तथाविकं आनुमेकसफंचे
ववंपश्चनाविड्जामपि आतिदीर्णंतथातक्रंकरातिमथितंदधि ताम्रेणसंयुतंगव्यंक्षीरंचलवणान्वितं घृतंल
वणसंयुक्तंप्रयत्नेनविवर्जयेत् स्तूपान्नंचगुडान्नंचशर्करामधुसंयुतं मरीचिमिश्रंदध्यन्नंपायसान्नंफलैः
सह तुलसीदलसंमिश्रजलैःसंप्रोक्षयवाग्यतः अष्टाविंशतिवारंतुमूलमंत्राभिमंत्रितं मुद्रांचसौरभेयींतां
दर्शयेन्मंत्रमुच्चरन् सुधादोग्ध्रीममृतंबीजंचिंतयन्परमात्मनः दद्यात्पुष्पांजलिंपश्चाद्दशवारंसमाहितः
आपोशानक्रियापूर्वमन्नमस्मैनिवेदयेत् शतवारंजपेन्मंत्रंघंटाशंखनिनादयन् जपेत्पौरुषदेवत्यान्मं
त्रानेकाग्रचेतसा हरेर्भुक्तवतः पश्चाद्दद्याद्वारिसुवासितं पश्चादाचमनंदद्याज्जलेगंधादिमिश्रितैः मु
खवासंततोदत्वापुष्पांजलिमथाचरेत् हविःशेषंबेणदेवानांबलिंभुविविनिक्षिपेत् चंडादिद्वारपालानां
सर्वेषांचदिवौकसां दद्यादुदकपूर्वेणहविःशेषंद्विजोत्तमः अत्यंचपौरुष[illegible]सूरसत्तमान् । राम॰ २१

२१

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

षे

सुसीलाचसुलक्ष्मणा संकर्षणादिमूर्तीनांशक्तयःसमुदाहृता। वेदवेदवताधात्रीमहालक्ष्मीसुरवालया भार्गवी
चतथासीतारेवतीरुक्मिणीप्रभा। मत्स्यकूर्मादिमूर्तीनांशक्तयःसंप्रकीर्तिताः एवंसंशक्तयःपूज्याःकेशवाद्या
सुरेश्वरा। पश्चात्सशक्तयःपूज्याशंखचक्रादिहेतयः शंखचक्रगदापद्मशार्ङ्गंचमुसलंहलं बाणंचखड्गखे
टंचक्षुरिकादिव्यहेतयः भद्रासोम्यातथामायाजयाचविजयाचविजयिशिवा। सुमंगलासुनंदाचहेतारम्या
सुरक्षणी शक्तयोदिव्यहेतीनांपूजनीयाःसनातनाः वह्निलोकेश्वराःपूज्याःसाध्याश्चसमरुद्गणाः एवमावर
णंसर्वमर्चयेत्परमात्मनः पुनरर्घ्यादिकंदत्वाधूपदीपौनिवेदयेत् प्रागुदीचीचसेनेशंनागराजंतथापरे पु
रतोविनतेयंचपूजयेच्छक्तिभिःसह सेनायतेःसत्त्ववतिनागराजस्यवारुणी भद्राचवैनतेजस्यपूजयेद्देवम
बोल्बणः गुग्गुलंमहिषाख्यंचसालनिर्यासमेवच अगरुंदेवदारुंचउशीरंश्रीफलंतथा ह्रीवेरंचंदनमुस्ता
दशांगधूपमुच्यते गवाज्येनचसंयोज्यदद्याद्धूपंसुवासितं कार्पासमार्कक्षौमंचशाल्मलीक्षीरकोद्भवं।
अम्भोदंकोटजंकाशतूलिकाष्टांगमुच्यते गवाज्यंतिलतैलंवाकुसुमैश्चसुवासितं संयोज्यवर्त्तिनादीपमु
त्तमंविष्णोर्निवेदयेत् नैवेद्यंभक्ष्यभोज्यान्नपायसापूपसंयुतं फलैश्चमहाभोज्यैश्चपानकैर्व्यंजनैःसह गवाज्यंच
दधिक्षीरंशर्कराचनिवेदयेत् शुक्लंतुविंध्यवृन्तंचसुरुच्यंवैनिवेदयेत् यच्चास्त्रेषुनिषिद्धंतत्प्रयत्ने
नवर्जयेत् कोद्रवंचोलकोलुत्थंपावनालंतथासितं निःपावांश्चमसूरांश्चतुषधान्यानिसर्वशः भुक्तं
पर्युषितंरूक्षंयज्ञिकर्मणिवर्जयेत् वर्जयेदारनालंचमद्यमांससमानिच निर्यासानवर्जयेत्सर्वान्वि

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

योद्विजाप्रोक्तास्तेषां वै मंत्रसत्क्रिया: सवर्णेभ्य: सवर्णासु जायते हीनजातय: तेषां संकरयोगाच्च प्रतिलोमानुलोम
जा: विप्रान्मूर्द्धाभिषिक्तस्तु क्षत्रियायामजायत वैश्यायां तु तथांबष्ठो निषाद: शूद्रजातया राजन्याद्वैश्यशूद्र
स्तु माहिष्योग्रौ तु तौ स्मृतौ शूद्राद्वैश्या तु करणं स्मृतं चेत्यनुलोमजा: विप्रायां क्षत्रियात्सूत: वैश्याद्वैदेहिकस्तथा
चंडालस्तु तत: शूद्रात्सर्वकर्मसु गर्हित: मागधं क्षत्रियायां वै वैश्यात्क्षत्ता तु शूद्रत: शूद्राद्योगवं वैश्या जन
यामास वै सुतं रथकार: करिण्यां तु माहिष्येण प्रजायते असंतस्तु तयोर्ज्ञेया: प्रतिलोमानुलोमजा: प्रतिलो
मा वै जाता गर्हिता: सर्वकर्मणि एतेषां ब्राह्मणा: षट्कर्मसु नियोजिता: त्रिकर्मसु क्षत्रियविशावेकस्मिन् शू
द्रयोनिज प्रतिग्रहं च हत्यर्थं ब्राह्मणस्तु समाचरेत् असद्वास्ततो प्रोक्ता निषिद्धं तद्विवर्जयेत् पाषंडा: पति
22 ता: पापा: तथैव प्रतिलोमजा: कुलटाश्चाविकर्मस्थास्तत: परिकीर्तिता: लवणं तिलकार्पासं चर्म च त्रपुसी
सकं आयसं मधु मांसं च विषमन्नं घृतं रजे किल्बिषं गजतुरंगं च सर्षपं जलमेव च तृणं काष्ठं च कूष्मांडं गो
शय्यां च विवर्जयेत् मातृषीं गर्दभं चैव वाजिनं च तथाविकं दासीमजां वृषभं च नावं चानुकृतीं तिला एव
माद्यमसत्द्रव्यं प्रयत्नेन विवर्जयेत् धान्यं वासांसि [illegible] निच सुवर्णरत्नमेव च पुष्पाणि फलमूलाद्यं सत्
द्रव्यं मुनिभि: स्मृतं सर्वं च प्रतिगृह्णीयाद्भूमिधान्यफलादिकं भूमिं यस्तु प्रगृह्णाति भूमिं यस्तु प्रयच्छति ता
वुभौ पुण्यकर्माणौ नियतौ स्वर्गगामिनौ धन्यं करोति दातारं प्रगृहीतारमेव च धान्यं न परं श्रेष्ठं इह लो
के परत्र च तस्माद्धान्यं धरित्रीं च प्रतिगृह्णीत सर्वत: कुसूलधान्य[illegible]धान्योऽथवा नृप शिलो राम: २२

विष्णुर्पितचतुर्भागं क्रमाद्द्रव्यस्य चार्पयेत् अनंततार्क्ष्यसेनेशापविश्राणां निवेदयेत् दीर्घेन तद्विसेद्यं पृथक् पा
त्रेषु निधापयेत् सर्वेषां वारिपूर्णेन पश्चात्पुष्पांजलिं चरेत् नीराजनं ततो दत्वा तांबूलं च निवेदयेत् प्रणामं च ततो भ
क्त्या तस्मै स्तोत्रैः शुभाद्यैः प्रसार्य बाहौ पादौ च बद्धांजलिना सह स्कंधवक्त्वान्तमिरेवं च प्रणामं दीर्घ उच्यते
नत्वा दीर्घप्रणामेन अष्टकृत्वाष्टकातमिरेवं च सर्वैश्चैवेश्मवैर्मंत्रैः कुर्यात्पुष्पांजलिं ततः सक्कैश्चाविष्णुदैवत्यै
र्नामभिः शार्ङ्गिणस्तथा ततः शुभासने स्थित्वा जपेन्मंत्रमनुत्तमं नासमुद्रादिपूर्वेण ध्यायन्वै कमलेक्षणं
अष्टोत्तरसहस्रं वा शतमष्टोत्तरं तु वा जप्त्वा पुष्पांजलिं दद्यात्स्वयमात्मानं चार्पयेत् ततः एवं होमेन देवेशं हृदीस्थ
कमलेक्षणं मनसैवार्चयित्वाग्निं तु समाधौ विरमेत्सुधीः प्रातरौपासनं कृत्वा ततो नंतं समाचरेत् आज्ये
न वरुणाच्चापि समिद्भिर्वा चरुणा यजेत् तंदुलैर्घृतमिश्रैर्वा बिल्वपत्रैरथापि वा तिलैर्वा कुसुमैर्वापि पायसैर्मि
मिरेव च यजन् पतिरध्यात्वा सर्ववेदमयं प्रभुं दिव्याभरणसंपन्नं शंखचक्रगदाधरं वरदं पुंडरीकाक्षं वामां
कस्थश्रियं हरिं यजमनःपिणवक्त्रोध्याय मंत्रद्वयेन च सर्वैश्चैवेश्मवैर्मंत्रैरेकैकेनाहुतिं तथा नामभिः के
शवाद्यैश्च स्वकैर्विष्णुप्रकाशकैः वैकुंठपार्षदेभ्यः सर्वेभ्यः कृत्वा चैव ततो बलिं क्षिपेच्चतुर्दिशानुत्तानुदिश्य च ततो
भुवि आचम्य पूजयेत्पश्चात् मदीयान् सुसमाहितः तेभ्यः प्रणम्य संतर्पयेत् देवताः वेदमध्यापय
च्चात्माधर्मशास्त्रं च संहिता सात्विकानि पुराणानि सेतिहासानि वैष्णवः सर्वोपनिषदामर्थसहितं सदसि विचि
तये तद्योगक्षेमार्थं वृत्तिं च कुर्यात्स्वकृत्याय यथार्हतः ब्राह्मणः क्षत्रियो वैश्यः शूद्रा वर्णाश्च यथाक्रमं आद्यास्त्र

धं

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

रा०
२३

एवं वस्त्राणां हि संक्रमो वनजने शास्त्रिक्यं यवनानां चनरामांसक्रियालया सारथ्यं वाहनानां चरयां मन्नलाम
पि एवमादि निषिद्धं यत् प्रातिलोम्यं तदुच्यते यत् सौम्यशीलं लोकेऽस्मिन् सौम्यं तदनुलोमकं मद्यादिरुशीललो
कानां शील्यं सौम्यमितीोच्यते न्यायेन पालयेद्राजा पृथिवीं शास्त्रमार्गतः स्वराष्ट्रकृतधर्मस्य सदा षड्भागसिद्धये
राज्ञो राष्ट्रकृतं पापं इति धर्मविदो विदुः तस्मात्तत्पालनं प्रयत्नात् यथा संरक्षयेद्ध्रुवं अग्निदं गरदं चौरं हिंस्रं दुष्ट
तमेव च धूर्तं पतितमित्यादीन् हत्वा देवा विचारयन् अकथयित्वा स्वपादेन गर्दभेनैवाधिरोप्यवै प्रवासयेत्स्व
राष्ट्रात्तु ब्राह्मणं पतितं नृपः कुलटां कामचारेण गर्भघ्नीं भर्तृहिंसिकां निःसत्यकर्मिणां सोऽशं छित्त्वा नारीं प्रवा
सयेत् न्यायेन दंडनेराज्ञः स्वर्गकीर्तिकरं भवेत् अन्यायदंडनेराज्ञः स्वर्गकीर्तिविनाशनं अदंड्यान् दंडयन्
23
राजा तथा दंड्यानदंडयन् अयशो महदाप्नोति नरकं चाधिगच्छति दिग्दंडस्त्वथ वाग्दंडो धनदंडो वधस्तथा
ज्ञात्वापराधं देशं च जनं कालं वयापि वा वयः कर्म च वित्तं च दंडं न्यायेन पालयेत् निश्चित्य शास्त्रमार्गेण
विधिज्ञैः सह पार्थिवः गुरूणां तु गुरुं दंडं पापानां च लघोर्लघुं व्यवहारान् स्वयं पश्येत् कुर्यात् सद्भिर्हितोऽन्वहं ।
मिथ्यापवाद शुद्ध्यर्थं पंच दिव्यानि कल्पयेत् ज्ञात्वा दिव्ये शुद्धिं अन्ते मानयेत्तान् महीपतिः तन्मिथ्याभिशंसिते
दुष्टं जिह्वाच्छेदेन दंडयेत् परद्रव्यादि हरणं परदाराभिमर्शनं यः कुर्यात्तु बलात्तस्य हस्तच्छेदः प्रकीर्तितः यो
गच्छेत् परदारांश्च बलात्कामात्मवान्नरः सर्वस्वहरणं कृत्वा लिंगच्छेदं च दापयेत् [illegible] नादेशं गु
रुस्त्रीगामिनं तथा ब्रह्मघ्नं च सुरापं वा गोस्त्रीबालनिषूदनं देवविप्रस्व [illegible] देवले

राम०
२३

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

छेनापिवाजीवेच्छूयान्नेषांपरंपरा जीवेद्यायावरैनैवविप्रःसर्वत्रसर्वदा वा[illegible]डानपलितोश्वान्य
देविकान् कृषिणावापिजीवेतसतांचानुमतेनवा नवाहयेदनुडुहंक्षुधितंश्रांतमेवच तस्यपुंस्त्वमहि
त्वैववाहयेद्विजपुंगवः कर्मलोपमकुर्वन्वैकृषिंकुर्वीतवैद्विजः हरेःपूजापथ्याकालेकृषिलोपेसमाचरेत्
नत्रास्यसंत्यजेद्विप्रस्तथायज्ञादिकमेवच आपद्यपिनकुर्वीतसेवांवाणिज्यमेवच असत्प्रतिग्रहंस्तेयंस्तथा
धर्मस्यविक्रमं अन्यायोपार्जितंद्रव्यमापद्यपिविवर्जयेत् महतांद्यापतंचैवनकुर्याद्वेदविक्रियं विदित्वैव
चसद्वृत्तिमेवंजीवेतधार्मिकः महाभागवतैर्दत्तंयत्किंचिन्मिश्रितंभवेत् असत्प्रतिगृहीतंचाविमलंतन्नसंश
यः प्रीतयेवासुदेवस्ययद्दत्तमसतामपि महाभागवतस्पर्शाद्दत्तशुद्धिरित्युच्यतेबुधैः तापादिपंचसंस्कारैस्तथा
कारैस्त्रिभिर्युतः हरेरनन्यशरणमहाभागवतःस्मृतः यक्षराक्षसभूतानांतामसानांदिवौकसां यत्प्रीतये
दत्तंतयापद्यपिवर्जयेत् वुकस्कंदौतथागणेदुर्गागणपभैरवाः यमस्कंदौनैर्ऋतश्चतामसादेवताःस्मृताः
एवंविशुद्धिद्रव्यस्यज्ञात्वागृह्णीतसत्तमः कृषिस्तुसर्ववर्णानांसामान्योधर्मउच्यते प्रतिग्रहस्तुवि
प्राणांराज्ञांक्ष्मापालनंतथा कुसीदंचैववाणिज्यंविशामेवप्रकीर्तितं सेवावृत्तिस्तुशूद्राणांकृषिर्वा
संप्रकीर्तिता अशक्तस्तुभवेद्राजापृथिव्यापरिपालने जीवेद्वापिविशांवृत्त्याशूद्राणांवायथासुखं कृ
षिवृत्तिःपशुपाल्यंसर्वेषांनानिषिध्यते स्तेयंपरस्त्रीहरणंहिंसाकुहकौतुके स्त्रीमद्यमांसलवणविक्रि
येपतितंस्मृतं अपकर्षेनकृषाणांजीवितंशिल्पकर्मभिः हीनंतुप्रतिलोमानामहीनमनुलोमिनां चर्मवे

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

दा॰ २४ रयंगच्छेत्तस्मात्तान्दंडयेत्तथा यस्त्ववर्णाश्रमं हित्वान्येन तु वर्त्तयेत् तं दंडयेत्पणशतं नाशयेत्तं विदेशतः सर्वे
ष्वेतेषु पापेषु धनदंडं प्रयोजयेत् पितेव पालयेत्सत्यान्प्रजाश्च पृथिवीपतिः प्रजासंरक्षणार्थाय संग्रामं कार
येन्नृप तस्मिन्मृतस्य नैवेह श्रेयो राज्ञां संग्राममूर्द्धनि मृते न लभते स्वर्गं जितेन पृथ्वीमिमां यशः कीर्त्तिप्रहृत्य
र्थं धर्मे संग्राममाचरेत् मुक्तशीर्षं मुक्तवस्त्रं पक्षहीनतया शिथिलं न हन्यादिदिने राजा युद्धप्रेक्षणकं जनात् भ
24 ग्नेस्वसैन्ये संग्रामे नायस्य विनिवर्त्तनं पदे पदे समग्रस्य यज्ञस्य फलमुच्यते नातः परतरं धर्मो नृपाणां कर
शालिनां युद्धलब्धां महीं सम्यग्दीयते नृपसत्तमैः जित्वा शत्रून्महीं लब्ध्वा यत्नेन परिपालयेत् पालिता
वर्द्धयेन्नित्यं हव्यं पात्रे विनिक्षिपेत् पात्रमुत्कृच्यते विप्रस्तपोविद्यासमन्वितः न विद्यया केवलया तपसा
वापि पात्रता श्रुतमध्ययनशीलेतपःस्त्वयच्यते बुधैः ईश्वरस्यात्मनश्चापि ज्ञानं विद्येति चोच्यते तथाविधेषु
पात्रेषु दत्वा भूमिं धनं नृप शासनं कारयेत्सम्यक् स्वहस्तलिखितादिभिः उपवीजीव्योपसंक्षेत्रं मध्ये देशे न षे
तनः दुर्गाणि तत्र कुर्वीत जनकोशात्मगुप्तये तत्र कर्मसु निष्णातान् कुशलान्धर्मनिष्ठितान् सत्यशौचयु
तान् शुद्धान्सुदक्षां स्थापयेन्नृपः षड्भाति भागाहार्थं स्यात्मासे मासे स्वधके त्रुवं धर्मस्यादिगुणं यथा तत्काल
सांप्रतं लेखयेत्तत्क्षणं सम्यक् सममासादिकल्पनैः देयं सहस्त्राधनि नैपुरुषैः स्ववशिभिरेव ततः वर्द्धनं सशानैर्ह
णाघ्याकालं यथोदयं शीघ्रं कृत्या शाखवला घातु न दद्याद्धीनेन ऋणं दंडयित्वैव ततो राजा धनिने दापयेदृणं छिन्ने
दग्धे यवा पत्रे साक्षिभिः परिकल्पयेत् वस्त्रधान्यहिरण्यानां द्विचतुस्त्रिगुणादिभिः न संसाक्षि[illegible] देशाका याम॰ २४

ब्राह्मणं गां च पितृमातृगुरूंस्तथा पादेन ताडयेद्यस्तु तस्य तच्छेदनं स्मृतं तेषां [illegible] हस्तं तु दोषं [illegible] तु काम
तः प्रत्येकं दंडं नं कुर्यात् दुर्हृतस्य परस्त्रियाः चुंबने ता[illegible]लु विच्छेदं दोर्हस्तौ परिरंभणे हस्तस्यांगुलिविच्छेदके
शादिग्रहणे स्त्रियाः दाहयेत्तप्ततैलेन हस्तं मुख्याच्चवादने सुरतं याचमानस्य जिह्वाच्छेदं च कामतः कामो
मितेषु सर्वत्र तालिकाच्छेदनं स्मृतं दृष्ट्वा मुहुः प्रेरणे तु नेत्रयोः स्फोटनं चरेत् मानकूटं तुलाकूटं कूटसाक्षि
कृतानृणं सहस्रं दापयेद्दंडं हत्वा सर्वस्वापहापयेत् येषु केषु च लापेषु शारीरं दंडनं स्मृतं तेषु ते[illegible] नैनै
व प्रसतो ब्राह्मणो व्रजेत् पापानि वा कथयित्वास्य मुंडयित्वा शिरोरुहान् सर्वस्वहरणं कृत्वा राष्ट्रात्सम्यक्प्रवा
सयेत् [illegible] वैष्णवो विकर्मस्थ हरिवासर भोजिनं ब्राह्मणं गां [illegible] यानमारोप्य विवासयेत् न्यायेन पालयेद्राजा
धर्मात् षड्भागमादिशेत् त्रिभागमा[illegible] अन्यायाद्धनात् षड्भागमेव च गोभिर्हिरण्यवासोभिर्धान्यरत्नविभू
षणैः पूजयेद्ब्राह्मणान्मंत्रापोषयेच्च विशेषतः विवाहितस्य[illegible] ग्रामे पुरगोरेषु च चैत्यान्यायतनानि
स्वर म्याणि [illegible] कारयेत् वसुपुष्पोमतारादिग्रभूधेन्वादि समर्पयेत् इतरेषां पुराणं च वैदिकानां जनेश्वरः
धर्मतः कारयेत् [illegible] चैत्यान्यायतनानि तु वापिकूपतडाकारदिफलपुष्पफलानि च कुर्वीत सुविसालानि पूर्व
कृतान्यपि पालयेत् फलितं पुष्पितं वापि वनं छिंद्यात्तु यो नरः तटाकानि तु यो भिंद्यात्तं जलेनावरोधयेत् अ
ग्निदं गरदं गोस्त्रीबालस्त्रीगुरुघातिनं भोगिनीमातृपुत्रीगुरुदारास्नुषामपि साध्वीं तपस्विनीं वापि गच्छत
मतिवादिनं हिंसयंत्रप्रयोक्तारं दाहयेत्कटाग्निना शूद्रं डापयित्वा दुहंत्रा [illegible] नतत्पापं पृथिवीपतेः संप्राप्यनि

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

हा·स्म: २५
श्चैवच नैव भागं वनस्थानां यतिनां ब्रह्मचारिणां निर्वासस्याव्यालिंगिनां चाश्रित्य पाषंडपतितानां च न चा
वैदिककर्मणां विभक्तेष्वनुनो जातः स्ववर्णाय दिभागमोक् अविभक्तापितृव्याणां पितृतो भाग
कल्पना द्वैमातृणां मातृतश्च कल्पयेद्व समेवच विभक्तस्यास्यपुत्रस्यपत्नीरक्षितस्तथा पि
तरौ भ्रातरश्चैव तत्सुताश्च सपिंडितः सर्वविधिबाधवाश्चैव क्रमाद्वैरिक्थभागिनः सीम्नापवादे द्वे
त्रेषु सामंताश्च विराट्यः गोपासीमाकृपाणां च सर्वे भवन गोचराः नयेपुरे तं सीमानं स्थाणांगार
तुषद्रुमैः न तु वाल्मीकनिम्नास्थिचैत्याद्यैरुपशोभितं औरसोदत्तकश्चैव कृतक्रित्रिमएव च ।
क्षेत्रजः कानिकश्चैव दौहित्रः सप्तमः स्मृतः पिंडदश्चवरश्चैषां पूर्वाभावेपरोवर पुत्रः पौत्रश्च तत्सुतः
पुत्रिकापुत्र एव च पुत्री च भ्रातरश्चैव पिंडदास्युर्यथाक्रमात् स्वधर्मेण नृपतिः शासयेत्स्ववेदा
प्रदौज्ञाः यदुक्तं मनुना धर्मव्यवहारपदं प्रति विलोकातं च चाकिंचिद्विवीतरागैर्विमत्सरैः विम
त्यधर्मो विद्वांसो विमले पापभीरुभिः धर्मेणैव सदा राजा शासयेत्पृथिवीमिमां विपरीतान् दंडये
द्यावदघौघनाशनं सम्यास्तपिचदंडावैशास्त्रमार्गविरोधिनः राजधर्मायमित्येवं प्रसंगात्कथितो
मया कात्यायनेन मनुयाज्ञवल्क्येन धीमता नारदेन च संप्रोक्तं विस्तरादिदमेव हि तस्मान्मया
विस्तरेणोक्तमत्र न योत्तम परं भागवतं धर्म विस्तरेणाद्यविमिते विष्णोरभ्यर्चनेन यत्तु नि
त्यं नैमित्तिकं नृप यथाह भगवान् धातुस्तेरैं न स्वायंभुवस्य च नारदस्य [illegible] तदघकथ राम· २५

25

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

लोत्तरादिभिः शोधयित्वा तु दिव्येन दापयेद्धनिने क्रमं मध्यस्थस्थापितं द्रव्यं वर्द्धते न ततः परं कालेनापरिग्रहे चा
दौ पूर्वादेव वलोत्तराः आदिस्तु द्विविधः प्रोक्तो भोग्यो गोप्यस्तथैव च क्षेत्रारामादिकं भोग्यं गोप्यं द्रव्यमुदस्तरं गोप्याधि
भोगेनो वृद्धिः सोपस्कारार्थस्थापिते नष्टे देयं विनष्टे चेद्दैवराजकृतादृते उपस्थितस्य मोक्तव्य आदिस्तेनोन्यथा भ
वेत् प्रयोजने सति धनं कुलेन्यस्यादिमाप्नुयात् तत्कालकृतमूल्यो वा तत्र तिष्ठेदवृद्धिकं विनोपारिका
द्यपि विक्रयेण तत्सभासाक्षिकं वसतेस्य तनास्थाप्य यदन्यस्य न दीयते तदीयनिधिकं द्रव्यं प्रतिदेयं तथैव च न
दाप्योपहृतं तत्तु राजदैविकतस्करैः यः प्रदद्यात्तु तन्मोहात् सदंड्यश्चोरवत्तदा आजीवन्त्स्वेच्छया दंड्यो दाप्यास्त
चापि सोदयं याचितान्वाहितन्यासनिक्षेपादिष्वयं विधिः सुराकामद्यूतकृतं दंडशुल्कावशि
ष्टं च पुत्रो दद्यान्न पैत्रकं पितरि प्रोषिते प्रेते व्यसनाभिप्लुते पि वा पुत्रपौत्रैर्ऋणं देयं निह्नुते साक्षिभावितं रि
क्थग्राही ऋणं दद्याद्योषिद्ग्राहस्तथैव च पुत्रोनन्याश्रितद्रव्यः पुत्रहीनस्य रिक्थिनः प्रातिभाव्यमृणं साक्ष्यं देयं
तस्मै यथोचितं दीयते स्यात् प्रतिभू यद्धनिनेतु ऋणमयथा द्विगुणं तत्प्रदातव्यं दंडराज्ञे च तत्समं पुत्रादिभिर्न दा
तव्यं प्रातिभाव्यमृणं स्त्रिया प्रतिपन्नं स्त्रियादेयं पत्या चय दृणं कृतं स्वयंकृतं तु यदृणं नान्यस्त्री दातुमर्हति
पत्येरां कं धनं पुत्रा विभजेयुः मुनिर्णयं मातृकं चेद्दुहितारस्तदभावे तु तत्सुतः भगिन्यश्च तुरीयांशं पैत्रिका
दास्यरेस्तनात् न स्त्रीधनं तु दायादा विभजेरन् पुरनाद्यि यदि पितृमातृसुतभ्रातृधमध्याग्रुपागतं आदिवेदनि
काद्यं च स्त्रीधनं परिकीर्त्तितं अपुत्रा योषितश्चैव नर्त्तव्यास्साधुवृत्तयः निर्वास्याव्यभिचारिण्यः प्रतिकूलास्तु।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

द्वा०स्मृ० २६ भीतजनार्द्दनः एवंहन्निर्म्मवेदस्मिन्सधर्मः परमो मतः एषानिः कंस्कंपथ्यानस्य विध्मेंपरंपदं अप्र
न्यत्तु कुपथं ज्ञेयं निरयप्राप्तिहेतुकं भगवंतमनुद्दिश्य यः कर्म कुरुते नरः स पाषंडीति विज्ञेयः सर्व्वलो
केषु गर्हितः योहि विष्णुं परित्यज्य सर्व्वलोकेश्वरं हरिं इतरानर्चयेत् मोहात् स लोकायतिकः स्मृतः श्रु
तिस्मृत्युदितं धर्मं त्यक्त्वा यश्चरेन्नरः विकर्मस्थः स विज्ञेयः सर्व्वकर्मसु गर्हितः यो वेदार्थं गर्हयति
धर्माधर्मौ न विंदति न बुध्येत् परलोकं यः स नास्तिक उदाहृतः उक्तं धर्मं परित्यज्य योऽन्यधर्मे च वर्त्तते
पतितः स तु विज्ञेयः सर्व्वधर्मबहिष्कृतः यः कर्म कुरुते विप्रो विना विष्णुर्चनं क्वचित् ब्रह्मण्याङ्गस्य
२६ तेस घण्डालत्वमगाछति ब्राह्मणो वैष्णवो विप्रो गुरुरग्न्यश्च वेदवित् पर्यायेणाच विद्येत नामानि
दमासुरस्य च तस्माद्वैष्णवो विप्रो न विप्रत्वाद्दृश्यते हरिः अर्चयित्वापि यो विदं इतरानर्चयेत् पृथ
क् अवैष्णवत्वं तस्यापि निश्चमत्या भवेध्रुवं भोक्तारं सर्व्वयज्ञानां सर्व्वलोकेश्वरं हरिं ज्ञात्वा तस्मी
तये सर्व्वान् जुहुयात् सततं हविः दानं तपश्च यज्ञश्च त्रिविधं कर्म कीर्त्तितं तत्सर्व्वं भगवत्प्रीत्यै कु
र्वीत सुसमाहितः तस्मात्तु वैष्णवाः विप्राः पूजनीया यथा हरिः येतु वेदे तु कं वाक्यमाश्रित्यैव
स्ववाग्बलात् वैष्णवं प्रतिषिध्यंति ते लोकायतिकाः स्मृताः योयत्तु वैष्णवं लिंगाधरबाच तमसा
हतः त्यजेच्च वैदिकं धर्मं सोपि पाषंडतां व्रजेत् तस्मात्तु वैष्णवो भूत्वा वैदिकीं वृत्तिमाश्रितः। राम०
कुर्वीत भगवत्प्रीत्यै कुर्यायज्ञादिकर्म यत् तद्विशिष्टमिति प्रोक्तं सामान्यमितरं स्मृतं फलहीं २६

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

यामिते इति श्रीहारीतस्मृतौ विशिष्टपरमधर्मशास्त्रे प्रातःकालभगवत्समाराधनविधिर्नाम चतु
र्थोऽध्यायः ४ अम्बरीष उवाच भगवन् ब्रह्मणा प्रोक्तं संप्रोक्तं स्वात्मनो पुरा तत्सर्वं परमं धर्मं वक्तुमर्ह
सि मेऽनघ संगो हारीत उवाच सर्गादौ लोककर्त्तासौ भगवान् पद्मसंभवः मनवादीन्स्वान्विप्रान्ससृ मु
जे धर्मगुप्तये मनुर्भृगुर्वसिष्ठश्च मरीचिर्दक्ष एव च अंगिरा पुलहश्चैव पुलस्त्यात्रिमहातपा वे
दांतपारगास्तेन च ते प्रणम्य जगद्गुरुं भगवन्परमं धर्मं भववेधापनुत्तये वद सर्वं तं शेषेण श्रोतु
मिच्छामहे वयं इत्युक्तः स द्विजैः सोपि ब्रह्मा नत्वा जनार्दनं वेदान्तगोचरं धर्मं तेषां वक्तुं प्रचक्रमे
सर्वेषामेव लोकानां स्रष्टा धाता जनार्दनः सर्ववेदान्ततत्त्वार्थः सर्वज्ञमयः प्रभुः यज्ञो वै विष्णुरि
त्यत्र मत्स्यपक्षेऽभ्यते श्रुतिः इज्यते यत्तमुद्दिश्य परमो धर्म उच्यते भगवंतमनुद्दिश्य हूयते यत्र कु
त्रचै तत्र हिंसाफलं पापं न वेदत्रयविगर्हितं तस्मात्सर्वस्य यज्ञस्य भोक्तारं पुरुषं हरिं ध्यात्वैव कुर्याज्जुहुया
त्तस्मै हव्यं दातृकृताशने मुखमग्निर्भगवतो विष्णोः सर्वगतस्य वै तस्मिन्नेव यजन्नित्यमुत्तमं मुनिस
त्तमाः याजेद्विप्रमुखेशंस्त्याजलमन्नफलादिकं प्रीतये वासुदेवस्य सर्वभूतनिवासिनः तेनैव वा।
चे ये नित्यं नमस्कुर्यात् हरिमेव हि ध्यात्वा जपेत्तमेवेशं तमेवाध्यापयेच्छ्रुतिं तन्नामैव प्रदातव्यं वाचाव
क्तव्यमेव च व्रतोपवासनियमानतमुद्दिश्यैव कारयेत् तत्समर्पितभोगस्यादन्नपानादिभक्षणे म
तिस्त्वार्थः स्यादारेषु नेतरत्र कदाचन नोदिस्यात्सर्वभूतानि यज्ञेषु विधिना विना सोऽसदा सो भगवत्तो ममस्वा

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

रा·रह· यद्विजः कौपीनमुत्तरीयं स्याद्वनस्य ब्रह्मचारिणः शुक्लकाषायवसनो गृहस्थस्य यतेः क्रमात् उ
२१ ष्णालाभेषु सर्वे वा कुशचीरं विशिष्यते मौञ्जीं वै मेखलां दण्डं पालाशं ब्रह्मचारिणः त्रयस्तु वैण
वा दण्डी यतेः काषायवाससि कुशचीरं वल्कलं वा वनस्थस्य विधीयते कटिसूत्रं च कौपीनं
महतीं शुक्लवाससी कुण्डले चाङ्गुलीयानि गृहस्थस्य विधीयते मुण्डितोस्तु क्षमशिखी नोपपद्यते
वासिनावुभौ वानप्रस्थो जटाधारी स्यात्स्याद्वा वैश्मश्रुरोमधृत् सुकेशी सुशिखो वा स्याद्गृहस्थः सौम्यमे
षवान् यतिश्च ब्रह्मचारी च उभौ भिक्षाशिनौ स्मृतौ शाकमूलाशी स्याद्वनस्थः सततं द्विजः कुसूल
97 कुम्भधान्यो वा त्र्याहिको वाप्यवेश्च गृही प्रतिग्रहेण सौम्येन जीवेद्यायावरेण वा यस्त्वेकदण्डमाले
व्य धर्मं यत्नात्स्य परित्यजेत् विकर्मस्थो भवेद्विप्रः स याति नरकं ध्रुवं शिखायज्ञोपवीतादि ब्रह्मक
र्मयतिस्त्यजेत् सुजीवन्नेव चाण्डालो मृतश्वा नोपजायते स्वरूपेणैव धर्मस्य त्यागो हानिर्भवे
द्ध्रुवं कर्मणां फलसंत्यागः संन्यासः समुदाहृतः तुष्ट्यर्थं वासुदेवस्य धर्ममेवं यः समाचरेत् स
संन्यासी च योगी च स मुनिः सात्विकः स्मृतः अनाश्रितः कर्मफलं कृत्यं कर्म समाचरेत् स संन्यासि
च योगी च स मुनिः सात्विकः स्मृतः तुष्ट्यर्थं वासुदेवस्य धर्ममेवं समाचरेत् स योगी परमैकान्ता
स्तेः प्रियतमो भवेत् मोहादास्य विना विप्रो किंचित्कर्म समाचरेत् न तस्य फलमाप्नोति तामस राम·
सीं गतिमश्नुते छित्वा यज्ञोपवीतं तु छित्वा च कस्य धारणं छित्वा शिखां पुण्ड्रं च लिप्तं चाप्नश्यते २१

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

नाभवेत्सातुसामान्यावैदिकीक्रिया तोयवर्जितनदीवनिरर्थंभवतिध्रुवं भेदाग्रेकतुर्जीवानांदास्यं।
विष्णोःसनातने तद्विनावर्त्ततेमोक्षादात्मचौरःसनातनात् तस्मात्तुभगवद्दास्यमात्मनांश्रुतिचोदि
ते दास्यविनाकृतंयत्तुतदेवकलुषंभवेत् विशिष्टंपरमंधर्मंदास्यंभगवतोहरेः अथयज्ञत्तु कथं
दास्यंस्मृतेद्धृतिःकथंनेसार्गिकेनतुणा तत्सर्वंबुद्धिमत्त्वेनलोकानुग्रहकाम्यया सुदर्शनोर्द्ध्वपु
ण्ड्रादिधारणंदास्यमुच्यते तांत्रिकीवैदिकीयाचतद्दीक्षाचोदितक्रिया तत्राप्याराधनत्वेनकृ
तापापस्यनाशिनी निरूपणत्वाद्दास्यास्यधार्यंचक्रंमहात्मना अंगत्वात्सर्वधर्माणांवैष्ण
वत्वाच्चधर्मतः धृत्वावैविधिनाचक्रंहरेस्तत्प्रद्विजोत्तमाः कर्मकुर्याद्भगवतस्तस्यैवाज्ञामनुस्म
रन् विधिनैवधृतंतेनचक्रेणैवांकयेद्भुजे तथैवविभयाज्ञालेपुंड्रंशुभतरंसदा विभयाद्युपवी
तंतुसव्यस्कंधेविधानतः कंठेपद्माक्षमालांचकौशेयंदक्षिणेकरे एभिश्चिह्नैर्विनाविप्रोनभ
वेत्कथंचन सुलभेलक्ष्मणोक्तिवैदिकानांविशेषतः आश्रमाणांचतुर्णांचवर्णानांचश्रुतिः।
चोदनात् अंकयेत्शंखचक्राभ्यांधृतमाभ्यांविधानतः एकैकमुपवीतंतुयतीनांब्रह्मचारिणां
गृहीणांचवनस्थानांउपवीतद्वयंस्मृतं सोत्तरीयंत्रयंवापिविभयाशुभ्रतंतुना त्रयमूर्ध्वगतं
तंतुतंतुत्रयमधोवृतं तद्द्वयग्रथितेकेनउपवीतंइतीच्यते अर्ककौपासकौशेयक्षौमशा
णमयानिच तंतूनिचोपवीतानांयोज्यानिमुनिसत्तमाः सर्वेषामप्यलाभेतुकुर्यात्कुशम

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

श्रेयात् नापकृत्य हरेर्द्रव्यं यामार्चनपरो भवेत् भक्त्या संपूज्य देवेशं नासौ देवलकः स्मृतः भक्त्या योऽ
र्चयेद्देवं यामार्चा हरिमव्ययं प्रसादतीर्थस्वीकारान्नासौ देवलकः स्मृतः शंखचक्रोर्ध्वपुंड्रादिधारण
स्मरणं हरेः तन्नामकीर्तनं चैव तत्पादांबुनिषेवणं तत्पादवंदनं चैव तन्निवेदितभोजनं एका
एकादश्युपवासश्च तुलस्या वार्चनं हरेः तदीयानामर्चनं च भक्तिर्नवविधा स्मृता एकांतैर्नवविधै
र्युक्तो वैष्णवः प्रोच्यते बुधैः एतैर्गुणैर्विहीनस्तु न विप्रो न च वैष्णवः कर्मणा मनसा वाचा नप्रमाद्ये
जनार्दने भक्तिर्मा सात्विकी ज्ञेया भवेद्भवविचारिणी नान्यं देवं नमस्कुर्यान्नान्यदेवं प्रपूजयेत्
२८ नान्यप्रसादं भुंजीत नान्यस्यायतने विशेत् नत्रिपुंड्रं तथा कुर्यात्पदाकारं तथैव च नचान्यदेवता
भक्तिः पापाद्यपि कदाचन ध्यायन्यजन्नमेवेशं वैष्णवत्वमवाप्नुयात् वैष्णवः सर्वदेवानां पूजनीयो
यथा हरिः तस्मिन्संपूज्यमाने वै प्रसन्नो भवति हरिः क्षणात् पूजिते वैष्णवे विप्रे पूजितं स्याज्जगत्त्रयं य
त्रियस्य गृहे भुंक्ते तस्य भुंक्ते हरिः स्वयं हरिर्यस्य गृहे भुंक्ते तस्य भुंक्ते जगत्त्रयं महाभागवतो विप्रः स
ततं पूजयेद्धरिं पांचकाल्यविधानेन निमित्तेषु विशेषतः अप्स्वग्नौ हृदये सूर्ये स्थंडिले प्रतिमासु च
षट्स्वेतेषु हरेः पूजा नित्यमेव विधीयते स्नानकाले तु संप्राप्ते नद्यां पुण्यजले शुभे ध्यात्वा नाराय
णं देवं नागपर्यंकशायिनं द्वादशार्णेन मनुना सोऽर्चयित्वा दशताक्षिभिः अष्टोत्तरशतं जप्त्वा प्लात
तं स्नानं समाचरेत् एतदेवार्चनं प्रोक्तं ब्राह्मणस्य जगत्पतेः होमकाले तु सततं वारीसीयानलेषु



CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

एवं पंचसंस्कारपूर्वेण मंत्रमध्यापयेद्गुरुः संस्काराः पंचकर्तव्या पारमैकांत्यसिद्धये प्रतिसंवत्सरं कु
र्यात् पाकमेतदनुत्तमं सर्वदेवहितं कृत्वा यत्नेन पूजयेद्धरिं दद्याद्दशेषं पवित्राणि विष्णवे परमात्मने
ब्राह्मणेभ्यश्च दत्त्वाथ विभज्यात्मीयमेव च दत्तदग्नौ पूज्य सततं पंचशंखं च वाकयेद्भुजे स्ववैतद्वि प्र
कं धार्यमुपवीतं सुदर्शनं पुंड्रं तत्प्रतिसंध्यं तु नित्यमेव च धारयेत् हारवत्पुनर्वंशोपवीचेदनवै
कटौ च वै सांतरालं प्रकुर्वीत पुंड्रं हरिपदाकृति श्रीकृष्णलोविशेषेण कंठमालाश्च धारयेत् शु
दर्शनं चोर्ध्वपुंड्रं प्रधानं वैष्णवं स्मृतं न लभ्यते वैष्णवत्वमृते चक्रस्य धारणात् अर्थपंचकतत्व
ज्ञः पंचसंस्कारदीक्षितः महाभागवतो विप्रः सततं पूजयेद्धरिं नारायणः परं ब्रह्म विप्राणां दैवतं स
दा तस्य भुक्तावशेषं तु पावनं मुनिसत्तमाः हरिभुक्तोज्झितं दद्यात् पितृणां च दिवौकसां तदेव जुहुया
द्वह्नौ भुंजीयात्तु तदेव हि हरेरनर्पितं यत्तु देवानामर्पितं च यत् मद्यमांससमं प्रोक्तं तद्भुंजीयात्क
दाचन तु हरेः पादजलं प्राश्यानित्यो नान्यो दिवौकसां सुराणामितरेषां तु फलं पुष्पं जलादिकं नि
र्माल्यमशुभं प्रोक्तमस्पृश्यं तत्कदाचन विधिरेष द्विजातीनां नेतरेषां कदाचन शिवार्चा न त्रि
पुंड्रं च शूद्राणां च विधीयते न द्विजानामिदं ये च द्विजविप्राः शिवपरायणाः ते वै देवलकाः ज्ञेयाः स
र्वकर्मबहिष्कृताः वैखानसाश्च ये विप्राः हरिपूजनतत्पराः न ते देवलका ज्ञेयाः हरिपादाब्जसं।

त

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

रा०म०
२७

र्च्यगोविंदंनमस्कृत्वाविसर्जयेत् एवमर्च्चयेद्देवंत्रिसंध्यासुतथाहरिं वेश्मवेवावसनेतुपुरस्ता
द्विभावसौ उपलिप्यस्थंडिलेतुजुहुयाद्बलिकमवत् ध्यात्वासर्वगतंविष्णुंघनश्यामंसुलोच
नं कौस्तुभोद्भासितोरस्कंतुलसीवनमालिनं पीतांबरधरंदेवंरत्नकुंडलशोभितं हरिचंदनलि
प्तांगंपुंडरीकायतेक्षणं मौक्तिकान्वितनासाग्रंजगन्मोहनविग्रहं गोपीजनैःपरिवृत्तंवेणुगा
यतमच्युतं ध्यात्वाहृत्कमलेजगन्नाथंपूजयित्वायथाविधि जुहुयाद्बलिचक्रेतद्देवानुदिश्यसत्तमाः
। जप्त्वाकर्ममनुंपश्चादभ्यर्च्यमनसाहरिं प्राचमप्यप्रयतोभूत्वानमस्कृत्वाविसर्जयेत् स्थंडिले
ऽर्च्चनंविष्णोरेवंकुर्याद्विधानतः त्रिसंध्यास्वर्चयेद्विष्णुंप्रतिमासुविशेषतः सुवर्णरजताद्यैर्वाशि
29 लादारुविदिनापिवा कृत्वाविग्रहंहरेःसम्यक्चारुवाव्ययवस्थितं सर्वलक्षणसंपन्नंसर्वायुधसमन्वि
तं ततोधिवासनंकुर्यात्त्रिरात्रंशुभवासरेषु तत्रार्चयेद्विधानेनजप्त्वानामादिकमेभिः स्नाप्यपंचा
मृतैर्गंधैस्नाप्यामंत्रजलैरपि यज्ञविध्यासमारोप्यपूजयेत्तत्रदीक्षितः मंगलद्रव्यसंयुक्तैःपूर्ण
कुंभैःसमन्वितैः ससर्वद्रव्यसंपूर्णैःपताकैस्तोरणादिभिः कुंभेषुवासुदेवादीन्सुरान्संपूजयेत्क्र
मात् वासुदेवोहयग्रीवस्तथासंकर्षणोविभुः मत्स्यावराहःप्रद्युम्नोनारसिंहस्तथैवच अनिरुद्धोवा
मनश्चपूजनीयायथाक्रमात् तस्यपूर्णाश्चाराश्चेषुलोकेशानर्चयेत्ततः मध्येतुधारणंकुंभंपंच
रत्नसमन्वितं पूजयेद्गंधपुष्पाद्यैर्ध्यात्वास्मिन्जलशायिनं ततःसंपूजयेद्देवंध्यात्वोपरिनिधाय राम०
२७

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

मे यज्ञरूपंमहात्मानंचिंतयेत्पुरुषोत्तमं सांगंत्रयीमयंशुद्धंदिव्यांगोपांगशोभितं सर्वलक्षणसंपन्नं
शुद्धजांबुनदप्रभं युवानंपुंडरीकाक्षंशंखचक्रधनुर्द्धरं सर्वयज्ञमयंध्यात्वैवंहोमोक्तमितपन्नजा
संप्रज्यचाक्षतैरेवपश्चाद्धोमंसमाचरेत् प्राणाग्निहोत्रसमयेसम्यगाचम्यवारिणा कुशासनेसमा
सीनःप्रागवाप्रत्यङ्मुखोपिवा परिषिच्यसमात्मानंप्राणायामंसमाचरेत् मंत्रेणोद्बुध्यहृदयेपंक
जेकेशरान्विते तस्मिन्वह्न्यर्कसोमांशुविवानप्युविचिंतयेत् सर्वाक्षरमयंदिव्यंरत्नपीठंतदुत्तरे
तन्मध्येष्टदलंपद्मंध्यायेत्कल्पतरोरधः वीरासनेसमासीनंतस्मिन्नीशंविचिंतयेत् स्निग्धदूर्वा
दलश्यामंसुंदरंभूषणैर्युतं पीतांबरयुगंवानेचचंदनेस्रग्विभूषितं शरत्पद्मासनेरक्तपद्माभांघ्रिक
रद्वयं स्निग्धवर्णमहाबाहुंविशालोरस्कमव्ययं चक्रशंखधनुर्बाणपाणिंरघुवरंहरिं जानकी
लक्ष्मणोपेतंमनसैवार्चयेद्द्विजः मंत्रद्वयेनार्चयित्वाजप्त्वाचैवषडक्षरं पश्चाद्वैजुहुयात्तंचप्राण
नभ्यर्चतंपुनः ध्यायन्वैमनसाविष्णुंसुखंभुंजीतवाग्यतः एवंहृद्यर्चनंविष्णोरुक्तंमयामुनिसत्तमाः ॥
अत्यंतामिमतांविष्णोर्हृद्यत्पूजांपरमात्मनः संध्याकालेतुसंप्राप्तेरविमंडलमध्यगं हिरण्यग
र्भंपुरुषंहिरण्यवपुषंहरिं श्रीवत्सकौस्तुभोरस्कंवैजयंत्याविराजितं शंखचक्रादिभिर्युक्तंभू
षितंदोर्भिरायतैः शुक्लांबरधरंविष्णुंमुक्ताहारैर्विभूषितं ध्यात्वासमर्चयेद्देवंकुसुमैरक्षतैरपि
पूर्णेणैनचसावित्र्यापश्चात्सक्रान्निवेदयेत् ध्यायन्नेवंजपेद्विष्णुगायत्रींभक्तिसंयुतः तथैवा

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

कैश्च ऋत्विजः कलशोदकैः ततस्तन्मध्यमे कुंभे आदाय द्विजसत्तमः स्नापयेन्मंत्ररत्नेन शतवारं समा
हितः सौवर्णेन च ताम्रेण शंखेन रजतेन वा स्नाप्य पंचामृतैर्गव्यैः रुद्रसूक्तपुरुषचंदने मंत्रेण स्नापयि
त्वा तुलसीमिश्रितैर्जलैः वासोभिर्भूषणैः सम्यगालंकृत्य च वैष्णवः उपचारैः समभ्यर्च्य पश्चान्नीराज
येत्तदा अलंकृते शुभे गेहे पीठे संस्थापयेद्धरिं सूक्तेनोत्तानपादस्य हृद्ध्ये स्थाप्य सुखासने अष्टोत्तर
शतवारं पृथग्मंत्रे चतुष्टयात् ध्यात्वा पुष्पांजलिं दद्यान्महाभागवतोत्तमः नत्वा गुरुं परं धाम स्थितं
देवं जनार्दनं ध्यात्वैवं मंत्ररत्नेन तस्मिन्विवेनिवेशयेत् अर्चयित्वोपचारैस्तु मंगलानि निवे
दयेत् दर्पणं कपिलां कन्यां शंखं दूर्वाक्षतान् पयः सौवर्णमाज्यपलजाश्वमधुसर्षपमंजनं एवं त्र
योदशमानि मंगलानि च निवेदयेत् तथैव दशरथसुतास्य मंत्रेणैव समीक्षयेत् तद्विवमूर्त्तिमंत्रेण प

30

ञ्चाद्दशशातानि तु पुष्पाणि दद्यान्नत्वा च जपेच्च सुसमाहितः सतिलैस्तंदुलैः शुभ्रैर्जुहुयाच्च द्वि
जोत्तमाः आशीर्वाचनं कृत्वा दीपान्नीराजयेत्तदा भोजयित्वा ततो विप्रान् दक्षिणाभिश्च तो
षयेत् आचार्यमृत्विजश्चापि विशेषेण समर्चयेत् तदग्निसंग्रहे नित्यं होमार्थं परमात्मनः त्रि
रात्रमुत्सवं तत्र कुर्याच्छ्रद्धापयतात्मवान् वैष्णवैः पावमानैश्च तत्र पुष्पांजलिं चरेत् आज्येन च
रुणं वापि होमं कुर्वीत वैष्णवः प्रत्यहं भोजयेद्विप्रान्वैष्णवान्घृतपायसं तन्मूर्तिप्रीतये शक्त्या



दद्याद्वासिदक्षिणाः कुर्यादवभृते ष्ठिं च महाभागवतैः सह सहस्रनामभिर्दिव्यैः स्तोत्रैर्विष्णु



CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

च व्याघ्रचर्म समास्तीर्य तस्मिन् कौशेयवाससी निवेद्य पूजयेद्विष्णुं मूलमंत्रेण वैष्णवः तोरणेषु चतु
र्दिक्षु चंडादीनर्चयेत्तथा कुमुदादीन् सुरान् दिक्षु तथाधोमध्ये देवताः संपूज्य विधिना तस्मिन् पश्चाद्धोमं स
माचरेत् आग्नेयं कल्पयेत्कुंडं मेखलाद्युपशोभितं अश्वत्थारणीगर्भोद्धृत्याग्निं विनिक्षिपेत् वैष्ण
वस्य गृहस्थाग्निं समानीयानलं द्विजः गृह्योक्तविधिनादत्र प्रतिष्ठाप्य हुताशनं इध्माधानादिपर्यंतं कृत्वा
होमं समाचरेत् पायसेन गवाज्येन तिलैर्व्रीहिभिरेव च चतुर्भिर्वैष्णवैः सूक्तैः पायसं जुहुयाद्धविः ।
हिरण्यगर्भसूक्तेन श्रीसूक्तेन तथैव च अहं रुद्रेभिर्वाचा गवाज्यं जुहुयात्ततः त्वमग्ने द्युभिरिति सू
क्तेन प्रत्यृचं तिलैः समिद्भिः पिप्पलैः अस्य वामेति सूक्तेन प्रत्यृचं व्रीहिभिस्तथा अग्निं नरो दीधितिभिरि ति
ति सूक्तेन प्रत्यृचं तथा समिद्भिः पिप्पलोद्भवैः इति व्रतमुनिसत्तमाः अष्टोत्तरं सहस्रं वा सतमष्टोत्तरं तु वा
होतव्यमाज्यं पश्चात्तु तथा मंत्रचतुष्टयं वैकुंठपार्षदहोमं पायसेन घृतेन वा समाप्य होमं हविषः शे
षं तस्मै निवेदयेत् चतुर्मंत्रांश्चतुर्वेदांश्चतुर्दिक्षु जपेत्ततः तत्र जागरणं कुर्याद्गीतवादित्रन
र्तकैः रजन्यां तु व्यतीतायां स्नात्वा नद्यां विधानतः वैकुंठतर्पणं कुर्याद्वह्निविप्रब्राह्मणैः सह तर्प
त यित्वा पितॄन् देवान् वाग्यतो गृहमाविशत् आचम्य पूर्ववत्पूजां कृत्वा होमं समाचरेत् जुहुयाद्ब्र
ह्मणस्पत्यैः सूक्तैः घृतपायसं पौरुषेण तु सूक्तेन श्रीसूक्तेन तथैव च वैकुंठपार्षदं हुत्वा क
र्मशेषं समापयेत् नयनोन्मीलनं कुर्यात्सुमुहूर्ते न वैष्णवः महाभागते श्रेष्ठः सूक्ष्म हेमशलाकया
ह्यनेन वपुः कुर्वीत नयनोन्मीलनं हरेः निवेश्य पत्न्याः पीठे तु स्नापयेत्सुसमाहितः सर्वैश्च वैष्णवैः सू

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

शा॰मा॰ ३१

भोजयेत्पश्चात्पायसान्नं घृतान्वितं शक्त्या च दक्षिणां दत्वा विशेषेणार्चयेद्गुरुं सौम्यनामभिस्तुत्वा
आशीर्भिरभिवादयेत् प्रदक्षिणनमस्कारान्कुर्वीतात्र पुनःपुनः प्रसीद मम नाथेति भक्त्या संप्रार्थ
येद्विभुं दीपैर्नीराजयेत्पश्चाच्छ्रीसूक्तेन समाहितः कृतशेषहविः प्राश्य जप्त्वा मंत्रमनुत्तमं ध्याय
न्हृत्कमलपत्राक्षं भोक्ष्यस्यात्कृशोदरे एवं ग्राम्यार्चाविवस्य विष्णुं संस्थाप्य वैष्णवः अर्चयेद्विधिना
नित्यं यावद्देहनिपातनं शालिग्रामशिलायां तु पूजनेन परमात्मनः कोटिकोटिगुणाधिक्यं भवेदत्र न सं
शयः न जपो नाधिवासश्च न च संस्थापनक्रिया सालग्रामार्चने विष्णुस्तस्मिन्संनिहितः सदा ।
मूर्त्तिनां तु हरेः स्वस्य यस्यां प्रीतिरनुत्तमा तस्यामेवं कृतां ध्यात्वा पूजयेत्तद्विधानतः मूर्त्यंतरं न वि
31 वेत्तु न पश्यन्तं तदेवतत् शालिग्रामस्थिशिलायां तु पश्यन्यायी वै पुष्पमूलयः चेदर्चनेन वंदनेन दानप्रणाम
दर्शनेन च शालिग्रामशिलायां तु सर्वं कोटिगुणं भवेत् तस्मात् सर्वतीर्थेषु सर्वयज्ञेषु दीक्षितः ।
यो वै रसिष्ठ रसान्नित्यं शालिग्रामशिलाजले असत्यकथनं हिंस्याम भक्ष्याणां च भक्षणं शालिग्रामज
लं पीत्वा सर्वं दहति तत्क्षणात् द्विजानामेव नान्येषां शालग्रामशिलार्चनं बालकृष्णवपुर्देवं पूजये
द्द्विजः सदा पठनाच्चार्चयेद्विष्णुं विशिष्टः शूद्रयोनिजः स्थंडिले हृदये वापि पूजयेद्द्विजः सदा ।
वाराहं नारसिंहं च हयग्रीवं च वामनं ब्राह्मणः पूजयेद्विष्णुं यज्ञमूर्त्तिं च केवलं क्षत्रियः पूजये रा॰म॰
द्रामं केशवं मधुसूदनं नारायणं वासुदेवमनंतं च जनार्दनं प्रद्युम्नमनिरुद्धं च गोविंदं चाच्युतं ३१

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

प्रकाशकैः नघामवमं तं कृत्वा तर्पयित्वा पितृदेवताः अग्नं स्वधामेतिसूक्तेन पायसं मधुसंयुतं आज्येन मूलमं
त्रेण सहस्रं जुहुयात्तदा आशिषो वाचनं कृत्वा भोजयेद्द्विजसत्तमान् एवं संस्थाप्य देवं अर्चयेद्विधिना स
ह गृहार्चायाः स्थापने तु लघुतंत्रं समाचरेत् अधिवासनवेद्यादि मंत्रं तत्र विवर्जयेत् एकं अथ च गामे
षु विनिक्षिप्य परेहनि पंचामृतैः स्नपयित्वा पश्चात् कुर्च्चेनादिकं आदाय कलशं शुद्धं पवित्रोदकपूरि
तं निक्षिप्य पंचरत्नानि सुवर्णं तु वर्णं तुलसीदलं चंदनाक्षतदूर्वाश्च तिलान् धात्रीश्च सर्षपं अभिमं
त्र्य कुशैः पश्चान्मंत्ररत्नेन वैष्णवः सप्तवारं सहस्रं वा मंत्रेणैवाभिषेचयेत् सर्वैश्च वैष्णवैः सूक्तैः गायत्र्या
वैष्णवेन च नामभिः केशवाद्यैश्च सर्वैर्मंत्रैश्च वैष्णवैः स्नाप्य वस्त्रैर्भूषणैश्च शुभे धाम्नि निवेशयेत् स्थं
डिलेऽग्निप्रतिष्ठाप्य इध्माधानादि पूर्ववत् होमं कुर्यात्ततो वाज्येन पायसान्नेन वैष्णवः वस्तुरोपासना
न्नातु होममंत्र विशिष्यते प्रत्यृचं वैष्णवैः सूक्तैः जुहुयाद्घृतपायसं अग्निस्वधामेतिसूक्तेन गवाज्यं
जुहुयात्ततः मंत्ररत्नेन जुहुयादष्टोत्तरसहस्रकं ततो द्विमूर्तिमंत्रेण तिलहोमं चथैवच स्विष्टा
तस्य ततः मंत्रमूलमंत्रेण वा यजेत् यजेत् श्रीमत्प्रकाशैश्च गायत्र्या ॥ विष्णुसंज्ञयां वैकुंठपार्षदं होमं
कृत्वा होमं समापयेत् नयनोन्मीलनं कृत्वा सौवर्णेन कुसेन वा निवेश्यावाहयेत् पीठमंत्ररत्ने
न वैष्णवः मंत्रेणार्चयेत् कृत्वा पश्चात् पुष्पांजलिं ततः तस्मिन् बिंबे तु तन्मूर्तिं ध्यात्वा नियतमानसः
अष्टोत्तरसहस्रं तु दद्यात् पुष्पांजलिं ततः सर्वैश्च वैष्णवैः देवसूक्तैः दद्यात् पुष्पाणि वैष्णवः ब्राह्मणान्

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

रा.स. सकर्मसमाचरेत् आद्ययावाहनंविष्णोरासनेचद्वितीयया तृतीययाचतत्पाद्यंचतुर्थ्यार्घ्यंनिवेद
३२ येत् पंचम्याचमनीयंतुदातव्यंचततःक्रमात् षष्ठ्यास्नानेचसप्तम्यावस्त्रमप्युपवीतकं अष्टम्या
चैवगंधंतुनवम्याचसुपुष्पकं दशम्याधूपकंचैवएकादश्यादीपकं द्वादश्याचत्रयोदश्यानै
वेद्यंचनिवेदयेत् चतुर्दश्यानमस्कारंपंचदश्याप्रदक्षिणंषोडश्याशयनंदत्वाशेषकर्मसमाचरे
त् स्नानवस्त्रोपवीतेषुद्विरेवाचमनंचरेत् हुत्वाषोडशभिर्मंत्रैःषोडशाज्याहुतीःक्रमात् तथैवाज्ये
नहोतव्यमग्निःपुष्पांजलिंचरेत् तत्रसर्वंजयेत्सूक्तं पौरुषंसूक्तमुत्तमं कृत्वामाध्यान्हिकंस्नानं
उर्ध्वपुंड्रधरस्ततः नित्यसंध्यामुपास्याथरविमंडलमध्यगं हरिंध्यायन्नुदन्वोर्द्धंहंसः शुचिषदित्य।
32 चासावित्रीचजपेत्तिष्ठन्प्राणायामपूर्वतः सौपर्णेनानुवाकेनउपस्थानंजपेत्तथा आत्मानंपरि
षिच्याथदर्भान्तरपुरांजलिं दक्षिणांकेतुविन्यस्यजपयज्ञासयेद्बुधः सम्यक्कृत्यप्रणवंगायत्रीतु
जपेत्तदा शक्त्याचचतुरोवेदान्पुराणंवैष्णवंजपेत् चरितंरघुनाथस्यगीतांभगवतोहरेः ध्या
यन्वैपुंडरीकाक्षंजप्त्वाचाथउपस्पृशेत् पूर्ववत्तर्पयेद्देवंवैकुंठपार्षदंतथा देवानृषीन्पितॄंश्चै
वतर्पयित्वातिलोदकैः निःपीड्यवस्त्रमाचम्यगत्वामाविश्यपूर्ववत् पूजयित्वाच्युतंभक्त्यापौ
रुषेणविधानतः देवमूर्त्तिपितॄणांकंचमानुषंचविधानतः प्रीतयेसर्वयज्ञस्यतोतुर्विष्णोजग राम.
त्पतेः वैकुंठवैष्णवंहोमंपूर्ववज्जुहुयात्तदा चतुर्विधेभ्योभूतेभ्योबलिंपश्चाद्विनिक्षिपेत् हरिंगो ३२

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

हरिं संकर्षणं तथा प्रद्युम्नमनिरुद्धं च संपूजयेत्तथा बालगोपालवेषं वा पूजयेच्छूद्रयोनिजः सर्व
एव हि संपूज्या विप्रेण मुनिसत्तमाः सर्वेऽपि भगवन्मंत्रा जप्तव्याः सर्वसिद्धिदाः तस्माद्द्विजोत्तमः पूज्याः
स सर्वेषां भूतिमिच्छता पंचसंस्कारसंपन्नो मंत्रार्थकोविदः शालिग्रामशिलायां तु पूजयेत्पुरुषोत्त
मं पूजितस्तुलसीपत्रैर्ददाति सकलं हरिः यः श्राद्धं कुरुते विप्रः शालग्रामशिलाग्रतः पितॄणां
तत्र तृप्तिः स्यात्कल्पाकल्पान्तकं जप्तं हुतं तथा दानं वेदनं च जपक्रिया शालग्रामसमीपे तु सर्वं।
कोटिगुणं भवेत् ध्यात्वा कमलपत्राक्षं शालग्रामशिलोपरि पौरुषेण तु सूक्तेन पूजयेत्पुरुषोत्त
मं अनुष्टुवस्य सूक्तस्य त्रिष्टुबंतस्य देवता पुरुषो योजगद्बीजमृषिर्नारायणः स्मृतः प्रथमां विन्य
सेद्वामे द्वितीयां दक्षिणे करे तृतीयां वामपादे तु चतुर्थीं दक्षिणे तथा पंचमीं वामजानौ तु षष्ठीं
वै दक्षिणे तथा सप्तमीं वामकट्यां तु ह्यष्टमीं दक्षिणेऽपि च नवमीं नाभिदेशे तु दशमीं हृदि विन्यसेत्
एकादशीं कंठदेशे द्वादशीं वामबाहुके त्रयोदशीं दक्षिणे तु स्यास्यदेशे चतुर्दशीं अक्ष्णोः पंचदशीं मूर्ध्नि
षोडशीं चैव विन्यसेत् एवं न्यासविधिं कृत्वा पश्चाद्ध्यानं समाचरेत् सहस्रार्कप्रतीकाशं कंदर्पायु
तसन्निभं युवानं पुंडरीकाक्षं सर्वाभरणभूषितं पीनवृत्तायतैर्दोर्भिर्भूषितं भूषणान्वितैः चक्र
पद्मगदाशंखबिभ्राणं पीतवाससं शुक्लपुष्पानुलेपं च रक्तहस्तपदांबुजं सुस्निग्धनीलकु
टिलकुंतलैरुपशोभितं श्रियाभूम्या समाश्लिष्टं पार्श्वे ध्यात्वा समर्चयेत् यथात्मानि तथा देवे न्या

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स्मा·स्म· ३३ गाचम्यवारिणा हित्यक्तानिवेद्यविष्णोस्तत्स्वयंभुंजीतवाग्यतः प्रक्षाल्येपूर्व्वापत्यङ्मुखोवापिजान्वोरं
तःकरःशुचिः उदङ्मुखोवाप्यथैतुसमाशिनाभिपूजितः वंशतालादिपत्रेस्यकृतंवसनमस्मच काया
लमिष्टकंवापिपर्णात्तृणमयंतथा चर्मासनंशुष्ककाष्ठशिल्पपर्यंकमेवच निषिद्धदारुपीठंचदात
मस्थिमयंचैव्यत दग्धंचयातिलेतताले ग्राम्यसंचविवर्जयेत् विभीतकंतिंदुकंचकरंजंव्याघ्रिघात
कं भल्लातककपित्थंचहिंतालंशिग्रुमेवच निषिद्धतरवोह्येतेसर्वकर्मसुगर्हिताः शुद्धदारुमयेपीठे
समासीतकुशोत्तरे पीठत्वलीभेसौम्यस्यकेवलंकुशविष्टरं चतुरस्रंत्रिकोणंचवर्त्तुलंचार्द्धचंद्रकं
33 वर्णानामानुपूर्व्येणमंडलानियथाक्रमात् स्वलंकृतेमंडलेस्मिन्विमलाभाजनंन्यसेत् स्वर्णकांस्य
चरौप्यंचपर्णंवासास्त्रचोदिते चतुर्थपिपलकांस्यंलदर्द्धपादमेववा गृहीणामेवतोज्यंसात्ततोहीने
तुवर्जयेत् पलासपद्मपत्रेषुगृहीणांतुविवर्जयेत् यतीनांचवनस्थानांपितृणांचशुभप्रदं वटा
श्वत्थार्कपर्णानिकुंभितिंदुकयोस्तथा एरंडतालपत्रेषुकोविदारकरंजको भल्लातकाश्मपर्णानांच
र्णानिपरिवर्जयेत् मोचागर्भपलाशंचवर्जयेत्सर्वकर्मसु मधूकंकुटजंचैवन्नालकदलमुद्भवं ।
मातुलिंगपानसंचमोचाचमंदलानिच पालासपर्णंश्रीपर्णंशुभानीमानिभोजने यथालाभोपपन्ने
तुभोजनेघृतसंस्कृते पत्न्यादिभिर्द्दत्तमन्नंवासुदेवार्पितंशुभं गायत्र्यामूलमंत्रेणसंप्रोक्ष्यशुद्धवारि राम· ३३
णा ऋतेसत्याभ्यामितिमंत्राभ्यांपरिषेचयेत् अन्नरूपंविराड्पुरुषंध्यात्वामंत्रजपेद्बुधः ध्यात्वाहृत्पंक

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

दोहमात्रंतुतिष्ठेद्वातिथिर्वांछया ॥ भोजयेत्स्वागतान्कालेफलमूलोदनादिभिः महाभागवतान्विप्रान्
विशेषेणैवपूजयेत् मधुपर्कप्रदानेनपाद्यार्घाचमनादिभिः गंधैःपुष्पैश्चतांबूलैर्धूपदीपनिवेदनैः
ब्रह्मासनेनिवेश्यैवपूजयेच्छ्रद्धयान्वितः सकृत्संपूजितेविप्रेमहाभागवतोत्तमे षष्टिवर्षसहस्राणि
हरिःसंपूजितोभवेत् मोहादनर्चयेद्यस्तु महाभागवतोत्तमं कोटिजन्मार्जितात्पुण्याद्भ्रश्यतेनात्र
संशयः दिनमेकंगृहेयस्य यस्यभुंक्तेभागवतोत्तमः गृहेतस्यसमश्नातिशतवर्षाणिकेशवः मुखं।
हि सर्वदेवानांमहाभागवतोत्तमः तस्मिन्संपूजितेविप्रेपूजितंस्याज्जगत्त्रयं अर्थपंचकतत्त्वज्ञः
पंचसंस्कारसंस्कृतः नवभक्तिसमायुक्तोमहाभागवतोत्तमः कालेसमागतेतस्मिन्पूजितेमधु
सूदनः क्षणादेवप्रसन्नःस्यादीप्सितानिप्रयच्छति महाभागवतानांचपिबेत्पादोदकंतु यः सिर
सावाधरेन्नित्यंसर्वपापैःप्रमुच्यते यस्मिन्कस्मिन्दिवसेतिमहाभागवतोत्तमः अप्येकरात्रमथवा
तद्देशस्तीर्थसत्तमः भोजयित्वामहाभागान्वैष्णवानतिथीनपि ततोबालसुहृद्वृद्धान्बांधवांश्च
समागतान् भोजयित्वायथाशक्त्यायथाकालंजितक्षुधः भिक्षांदद्यात्प्रयत्नेनयतीनांब्रह्मचारि
णां शूद्रोवाप्यतिलोमोवापथिश्रांतःक्षुधातुरः भोजयेत्तंप्रयत्नेनगृहमभ्यागतोयदि पाषंडीपति
तोवापिक्षुधार्त्तोगृहमागतः नैवदद्यात्स्वपाकान्नंश्याममेवाप्रदापयेत् स्वशक्त्यातर्पयित्वाचह्यति
थीन्गृहमागतान् सम्यक्निवेद्यविष्णोस्तत्स्वयंभुंजीतवाग्यतः प्रक्षाल्यपादौहस्तौचसमा[illegible]।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सा.स्म. ३४ दद्यात् उद्धृत्य वामहस्तेन मुखेनोद्धृत्य यः पिबेत् सुरां वापि बेद्यस्तु स याति रौरवे शङ्खेनाथोदकं श
पीत्वा पेतके पतितो भवेत् पृथक् स्थलवणायुक्तं क्षीरं लवणसंयुतं दधिहस्तेन मथितं सुरापानसमं स्मृ
तं आरनालं रसं तद्वत् हस्ते यैवानर्पितं हरेः आयसेन तु पात्रेण नैव दद्यात् घृतादिकं नोच्छिष्टं घृतमाद
द्यात् पैत्रके भोजने निवा तथैव तु पुरोडाशं पृथ दाज्यं च माक्षिकं पानीयं पायसं क्षीरं घृतं लवण
मेव च हस्तदत्तं न गृह्णीयात् तुल्यं गोमांसभक्षणं अपूपं पायसं माषं यावकं कृसरं मधु केवलं यो पृथ्या
श्नाति तेन भुक्तं सुरासमं करंजं मूलकं शिग्रुलशुनं तिलपिष्टकं तालास्थि श्वेतवृंताकं सुरापानस
मं विदुः अन्यच्च फलमूलादि भक्ष्यपानादिकं च यत् स्रक्चन्दनादि ताम्बूलं यो भुंक्ते ह्यनर्पितं कल्प
34 कोटिसहस्राणि रेतो विण्मूत्रभुग् भवेत् सर्वाविन्नेण यो भुंक्ते सर्वयज्ञफलं लभेत् ध्यायन्नारायणं दे
वं वाग्यतः प्रयतात्मवान् भुंजानं नीततत्रैव ग्रासये दंबु निर्मलं अमृतोपिधानमसीति मंत्रेणाच्यु
तपाणिना किंचिदन्नमुपादाय प्रीतशेषेण वाग्मिना पेतकेण तु तीर्थेन भूमौ दद्यात्तदर्थिनां रौरवे
नरके घोरे वसतां क्षुत्पिपासया तेषामन्नं सोदकं च अक्षय्यमुपतिष्ठतु इति दत्वोदकं तेषां तस्मिन्ने
वासने स्थितः प्रक्षाल्य हस्तौ पादौ च मुखं वंशसो ध्रुवा रिभिः द्विराचम्य विधानेन मंत्रेण ग्रासयेज्जलं पि
त्वा मात्रजलं पश्चादाचम्य हृदयांबुजे राममिंदीवरश्यामं चक्रशंखधनुर्धरं युवानं पुंडरीकाक्षं ध्या राम:
त्वा मंत्रं जपेद्बुधः विभावसुमुपस्पृश्य समासीनः सुखासने वेदमध्यायये च्छिष्यानुशासं वा धर्मसंहिता ३४

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

जेविद्दंमुद्रांस्तदर्शयिति शंखचक्रगदापद्मपाणिनंदिव्यभूषणं मनसैवार्चयित्वाथमूलमंत्रेणवैम
व· पादोदकंहरेःपुण्यंतुलसीदलमिश्रितं· अमृतोपस्तरणमसीतिमंत्रेणप्राशयेत् उद्दिश्यवैहरिंप्रा
जु णाद्यानैंजुहुयात्सघृतंहविः· अन्नालाभेतुहोतव्यंशाकमूलफलादिभिः· पंचप्राणाद्याहुतयोमंत्रै
स्तैर्जुहुयाद्बुधैः· अज्ञायांप्राणेनाविष्टेतिमंत्रेणचयथाक्रमं तर्जनीमध्यमांगुष्ठैःप्राणायेतियजेद्विः·
मध्यमानामिकांगुष्ठैरपानायेत्यनंतरं कनिष्ठानामिकांगुष्ठैर्व्यानायेत्याहुतिंततः· कनिष्ठतर्जन्यं
गुष्ठैरुदानायेतिवैयजेत् समानायेतिजुहुयात्सर्वैरंगुलिभिर्द्विजः· अपामग्निर्वैश्वानरेत्यात्मन
मनंतरं शतमष्टोत्तरंमंत्रंमनसैवयतव्रतः ध्यायेन्नारायणंदेवंभोजनेतुयथासुखं वक्त्रादपा
तयन्ग्रासंचिंतयेन्मधुसूदनं नासानासूदपादस्कंनवेष्टितशिरस्तथा नस्कंदयन्नचतस
नवीक्षिनीथ्यवलोकयन् नाशिष्याप्रलपन्जल्पनपहिर्जानुकरोनच् अपादारोपितकरःपृ
थिव्यामपिवानच नप्रसारितपादश्चनोत्संगकृतभोजनः· नाग्नीयाज्ञायेयासार्द्धंनपुत्रैर्वाकदा
चन नशयानोनातिसंगोनविमुक्तशिरोरुहः· अन्नेहयानविकरन्निष्ठिवन्नातिकालया।
तिशब्दंनभुंजीतनवस्त्रार्धोपवेष्टितः· प्रगृह्यपात्रंहस्तेनभुंजीयात्पेलकेयदि चषकेपुटकेवा
पिवेपिवेत्तोयंद्विजोत्तमः· तक्रंवाप्यथवाक्षीरंपानकंवापिभोजने वक्त्रेणैसातद्व्रोणेनदत्तम
न्यनवापिवेत् ग्रासशेषंनचाश्नीयात्पीतशेषंपिवेन्नतु शाकमूलफलादीनांदंतछिन्नंनखा·

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सा॰स्म॰ ३५ दिवसेमघामूलोभयोरपि आस्तेमुहूर्तेउत्थायाचमेतत्पूयतात्मावान् यतिश्चब्रह्मचारीचवनस्थोविधवा
स्तथा अजिनेकंबलेवापिमौनीस्वप्यात्कुशोत्तरे ध्यायन्नोत्पद्मनाभंतुशयीरन्विजितेंद्रियाः आचरेयुःपरं
धर्मंयथावृत्त्यनुसारतः प्रातःकृत्यंजगन्नाथकीर्तयेत्पुण्यनामभिः शौचादिकंतुयत्कर्मपूर्वोक्तंसर्व
माचरेत् नैमित्तिकविशेषेणपूजयेत्प्रतिमव्ययं तत्तत्कालेतुतन्मूर्तेरार्चनंमुनिभिःस्मृतं प्रसुप्तेप
द्मनाभेतुनित्यमासचतुष्टयं शोभनादोलायामपिवाभक्त्यासंपूजयेद्विभुं क्षीराब्धौशेषपर्यंकेशयानंरमया
सह नीलजीमूतसंकाशंकोटिकंदर्पसुंदरं स्फुरत्किरीटहारादिकुंडलाद्यैर्मंडितं कौस्तुभोद्भासिततनुं
35 पीतवाससमच्युतं सर्वलावण्यसंपन्नंवैजयंत्याविराजितं लक्ष्मीकुचयुगस्पर्शशुभोरस्कंसुवर्चसं ।
ध्यात्वैवंपद्मनाभंतुद्वादशार्णेननित्यशः पूजयेद्गंधपुष्पाद्यैर्भक्त्यासध्यास्त्वपिवैष्णवः निवेद्यपायसा
न्नंतुदद्यात्पुष्पांजलिंततः सहस्रंशतवारंवाद्वयमंत्रंजपेत्सुधीः द्वादशार्णंमनुंचैवजुहुयादाज्येनति
लैश्चवा केवलेचरुणावापिजुहुयात्प्रतिवासरं अधःशायीब्रह्मचारीसर्वभोगविवर्जितः वार्षिका
श्चतुरोमासानेवमभ्यर्च्यकेशवं बोधयित्वाथकार्त्तिक्यांदद्यात्पुष्पाण्यनेकशः साज्यैस्तिलैःपायसेनम
धुनाचसहस्रशः मूलमंत्रेणमूर्तिंश्च हुत्वाचावभृथंततः सहस्रनामभिःस्तुत्वादद्यादर्पणमेवच
गत्वागत्वाथदेवेशंपूजयित्वायथाविधिः भोजयेद्वैष्णवान्विप्रान्दक्षिणाभिश्चतोषयेत् शुक्लप राम॰
क्षेनभोमासिद्वादश्यांवैष्णवःशुचिः पवित्रारोपणंकृत्वानामभिमात्रायतेन्यसेत् तथाक्षासिपर्यंतंस ३५

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

एवावस्तमितेसंध्यामाविष्टःकुर्वीतपूर्ववत् वह्निसंध्याकोटिगुणंगोष्ठेशतगुणंतथा गंगाजलेसहस्रंस्याद
नंतंविष्णुसन्निधौ उपास्यपश्चिमांसंध्यांजप्त्वाजप्यंसमाहितः पूर्ववत्पूजयेद्विष्णुंगंधपुष्पादिदत्तादिभिः
अष्टाक्षरविधानेननिवेद्यैवसमाहितः सायमौपासनंहुत्वावैश्वदेवहोमंसमाचरेत् ध्यात्वाष्टाक्षरंविष्णुंमंत्रे
णाष्टोत्तरंशतं तिलव्रीह्याज्यचरुभिः तत्रैकेनापिवायजेत् वैश्वदेवंमूलबलिंहुत्वातुचाचमेत् शय्या
यांविन्यसेद्देवंपर्यंकेसमलंकृते संविलानेगंधपुष्पधूपैरामोदितेशुभे शाययित्वाचदेवेशंनारायण
मनामयं नीलजीमूतसंकाशंमंदस्मेरमुखांबुजं कोटिकंदर्पलावण्यंदेवाभ्यांसहितंहरिं हिरण्य
गर्भसूक्तेननासदासीत्यनेनच कृत्वापुष्पांजलिंपश्चादुपचारैःसमर्चयेत् श्रियेजातइत्यृचाचध्रु
वसूक्तेनचद्विजः दीपैर्नीराजनंकृत्वापश्चाद्धूपंनिवेदयेत् सुवाससायवनिकांविन्यस्याथसमाहि
तः द्वादशार्णमहामंत्रंजपेदष्टोत्तरंशतं अस्त्रेणशंखचक्राद्यैर्दिक्षुरक्षांतुविन्यसेत् स्तोत्रैःस्तु
त्वानमस्कृत्यपुनःपुनरनंतरं वैश्वदेवावशिष्टान्नंभुंजीयादर्पितंहरेः आचम्याग्निमुपस्पृश्यसुखमा
सीतवाग्यतः ध्यायन्हृदिपरेशानमनंतंसर्वतोमुखं लोकैकनायकंमंत्रंजपेदष्टोत्तरंशतं शेषा
हिशायिनंदेवंमनसैवसमर्चयेत् शयीतशुभ्रशय्यायांविमलेशुभमंडपे ततोगच्छेदृतौपत्नींवि
नापिचसुपर्वसुपुत्रार्थीचयुग्मासुस्त्रीकामोविषमासुचनश्राद्धदिवसेचैवनोपवासदिनेक्वचित् ।
नाशुचिर्मलिनोवापिनचैवमलिनांतथा नचक्रुद्धांनक्रुद्धःसन्नरोगीनचरोगिणीं नगच्छेत्क्रूर

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

रा·म· ३६ पिजायत्वाविष्णुसंज्ञया कृत्वापुष्पांजलिंदत्वाताभ्यामेवतथाविभो: स्वविष्णोदनंशुक्लंनक्तंभुंजी
तवाग्यत: तैलंशुक्लंतथामांसंनिष्पावात्मारिवकंतथा चणकानपिमाषांश्चवर्जयेत्कार्त्तिकेस्तनि मो
जयेद्धिमवानविप्रान्नित्यंदानानिशक्तित: अंतेचभोजयेद्विप्रान्दक्षिणाभिश्चतोषयेत् एवंसं
पूज्यदेवेशंकार्त्तिकेक्रतुकोटिभि: पुण्यंप्राप्यानघोमर्त्योविष्णुलोकेमहीयते दशमीमिश्रितांत्य
क्त्वैधांयामरुणोदये उपोष्यैकादशीशुक्लांद्वादशींवापिवैष्णव: स्नात्वामलकस्नानंधातुविधानेन
36 हरिंयजेत् सुवर्णकुसुमै:शुभ्रै:उपचारैश्चनित्यश: रात्रौजागरणंकृत्वापुराणंसंहितांपठेत् जागरे
स्मिन्नरा:कृष्णस्तत्कर्मानास्तीयेवैष्णवा: पुरतोवासुदेवस्यप्रभुमोर्च्यात्समाहित: तत:प्राभातसमये
तुलसीमिश्रितैर्जलै: स्नात्वासंतर्प्यदेवेशंतुलस्यामूलमंत्रत: द्वयेनवाविष्णुसूक्तै:कुर्यात्पुष्पांजा
लिस्तत: तथैवजुहुयादाज्यंमंत्रेणैवशतंतत: पायसान्नंविनिवेद्यसंभ्राह्मणान्भोजयेत्तत: धा
यकमलपत्राक्षेस्वयंभुंजीतवाग्यत: अर्च्यगंधपुष्पाद्यैर्नै:शेषंतुनिनयेत्पुराणंवाचयन्बुधै: ।
शायांतुसमनुप्राप्तेडोलायांपूजयेद्धरिं अभ्यर्च्यगंधपुष्पाद्यैर्नैवेद्यैर्नानाविधैरपि ब्राह्मणस्यतपस्य
क्तैश्चशनैर्डोलांप्रचालयेत् इतिहासपुराणाभ्यांगीतपाठै:प्रबंधकै: एवंसंपूज्यदेवतस्यानिशिसमा
हित: मध्याह्नेपूजयेद्देवंवैष्णवर्द्धैसमाहित: चंपकै:शतपत्रैश्चकरवीरै:शतैरपि वैष्णवेनैवमंत्रे रा·म·
णपूजयेत्कमलापतिं नकलिंद्वितिसूक्तेनदद्यात्पुष्पांजलिंहरे: मंत्रेणाष्टोत्तरशतंदद्यात्पुष्पाणि ३६

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तस्मिंतांतवस्त्रांते शुक्लग्रंथिसहस्रंतुपदांतेविन्यसेत्ततः सौवर्णीराजतीमालांशतग्रंथियुतांन्यसेत्
मृणालतंतवीपश्चात्पुष्पोमालाततःपरं शतमौक्तिकहाराणिनानारत्नमयान्यपि उपोष्यैकाद
शीतस्यरात्रौजागरणान्वितः अभ्यर्चयेज्जगन्नाथंगंधपुष्पोफलादिभिः निर्वाराचिन्तेनाद्यैःप्रभा
तेविमलेनदीं गत्वास्नात्वाचविधिनातर्पयित्वेशमर्चयेत् सर्वैश्चवैष्णवैर्मंत्रैर्मेध्याज्यतिलपायसैः
हुत्वाद्वादशशाणेनसहस्रंजुहुयात्ततः निवेदयेत्पवित्राणितथाविष्णोर्यथाक्रमं मंदिरंकुश
योक्तेनवेष्टयन्परमात्मनः वितानपुष्पमालाद्यैरत्नैःकृत्यचसर्वतः पश्चादरोपयेद्दिव्याः।
पवित्राणिशुभानिवै पवस्वसोमइतिचजपन्सूक्तंसुपावनं सहस्रंद्वादशार्णेनभक्त्यापुष्पां
जलिंन्यसेत् अथोपनिषद्युक्तानिपंचसूक्तान्यनुक्रमात् त्वयैदत्तमित्यादिजपन्पुष्पांज
लिंततः ब्राह्मणान्भोजयेत्पश्चात्स्वयंकुर्वीतपारणं शक्त्याश्चदुत्सवंकुर्यात्त्रिरात्रंवैष्णवोत्तमः।
प्रत्यब्दमेवंकुर्वीतपवित्रारोपणंहरेः क्रतुकोटिसहस्रस्यफलंप्राप्नोत्यसंशयः तत्रदुर्भिक्षरोगा
दिभयंनास्तिकदाचन सप्राप्तेकार्त्तिकेमासितस्याह्निपूजयेद्धरिं कृष्णैःपुष्पैश्चजातीभिःकोमलैस्तु
लसीदलैः अर्चयेद्विष्णुगायत्र्यानुवाकैर्वैष्णवैरपि पावनान्यैश्चतन्मासेभक्त्यापुष्पांजलिंन्यसे
त् अष्टोत्तरसहस्रंवाशतमष्टोत्तरंतुवा अष्टाविंशतिवाराश्चाद्दद्याद्दीपान्सपालिकान् सुवा
सितेनतैलेनगव्येनाज्येनवाहरेः अष्टोत्तरशतंनित्यंतिलहोमंसमाचरेत् मनुनावैष्णवेन।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

रा.म. ३७ येत् पश्चाद्धोमं प्रकुर्वीत पायसान्नं सशर्करं मंत्रेणाष्टोत्तरशतं सूक्तेन प्रत्यृचं तथा अग्निष्टोमानुवा
कैश्च समिद्भिः पिप्पलैर्यजेत् सहस्रनामभिः स्तुत्वा नमस्कृत्वा जनार्दनं वैष्णवान् भोजयेत्पश्चात्स्व
त् पायसान्नेन शक्तितः स्वयं भुक्त्वा हविःशेषं शयने नियतेंद्रियः एवं संपूज्य देवेशं पौर्णमास्यां जनार्द
नं सर्वपापविनिर्मुक्तो विष्णुसायुज्यमाप्नुयात् मघायामपि देवेशं पूर्वाह्ने सुगंधैर्जलैः संतर्प्य मंडलमं
त्रेण तिलमिश्रितवारिभिः तर्पयित्वा पितॄन्देवानर्चयेदच्युतं ततः कर्पूरैश्च तुलसीपत्रैः केतकैः कम
लैरपि शोभितैः करवीरैश्च जपाकुटजपाटलैः अस्य वामेति सूक्तेन दद्यात्पुष्पांजलिं हरेः मंत्रेणाष्टो
त्तरशतं कर्पूरैश्च तुलसीदलैः तथैव जुहुयादग्नौ तिलैः कृष्णैः सशर्करैः आज्येन पौरुषं सूक्तं प्रत्यृचं
37 जुहुयात्ततः नारायणानुवाकेन उपस्थाय जनार्दनं सुसंयावैः सोदकैश्च शाल्यन्नं विनिवेदयेत्
वैष्णवान् भोजयेत्पश्चात्स्वयं भुंजीत वाग्यतः तस्यां रात्रौ जपेन्मंत्रमयुतं हरिसन्निधौ वैष्णवैरनुवा
कैश्च दत्वा पुष्पांजलिं ततः पुरतो वासुदेवस्य भूमौ स्वप्यात्कुशोत्तरे एवं संपूज्य देवेशं मघायां वै
ष्णवोत्तमः उद्धृत्य वंशजान्सर्वान्वैष्णवं पदमाप्नुयात् व्यतीपाते तु संप्राप्ते हयग्रीवं जनार्दनं
तिलैश्च करवीरैश्च पुंडरीकैः प्रसमर्चयेत् धोरहत्यनुवाकेन प्रत्यृचं वै यजेद्बुधः मंत्रेण च शतं द
त्वा पश्चाद्धोमं समाचरेत् यवैश्च तंडुलैः पुष्पैरथापि वा मंत्रेणाष्टोत्तरशतं जुहुयाद्वैष्णवोत्तमः अष्ट
रेकादशसूक्तैः प्रत्यृचं हयपञ्चरं शेषं निवेद्य हरये संप्राश्याचमनं चरेत् सहस्रशीर्षसूक्तेन ह्युपस्थाय। राम॰ ३७

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

मन्त्रितः तथैव होमं कुर्वीत तिलैस्त्रिभिरेव वा सुगंधान्नफलयुतं नैवेद्यं विनिवेदयेत् दीपैर्नीराज
नं कृत्वा वैष्णवान्भोजयेत्ततः मन्त्रवारेषु नृत्याद्भिः लावत्सम्पद्गुणोचितः तिलैः स्नात्वा विधानेन सं
तर्प्य च सनातनं नृसिंहवपुषं देवं पूजयेत्तु विधानतः मंत्रराजेन गायत्र्या मूलमंत्रेण वा यजे
त् अखंडबिल्वपत्रैश्च जातिकुन्दैश्च पुष्पकैः शतैः पंचशतैर्वापि चत्वमानक्रमैरिति च दद्यात्पु
ष्पांजलिं भक्त्या मंत्रेणैव शतं यथा आभ्यामेवानुवाकाभ्यां प्रत्यृचं जुहुयाद्धुतं मंत्रेणाष्टोत्तरश
तं बिल्वपत्रैर्घृताक्तैः वैकुंठपार्षदं कृत्वा होमशेषं समापयेत् मधुशर्करसंयुक्तानपूपा
न्मोदकांस्तथा मंडकान्विविधान्भक्ष्यान्पायसान्नं मधुमिश्रितं सुवासितं पानकं च नृसिंहाय सम
र्पयेत् नृत्यं गीतं तथा वाद्यं कुर्वीत पुरतो हरेः भोजयेच्च ततो विप्रान्नव सप्ताथ पंच वा तदर्पितं
विष्णवान्नं भुंजीयाद्वाग्यतः स्वयं ध्यायन्नृसिंहं मनसा भूमौ स्वप्याज्जितेंद्रियः एवं शनिदिने देवमभ्य।
र्च्य नरकेशरिं सर्वान्कामानवाप्नोति सोऽश्वमेधफलं लभेत् षष्टिवर्षसहस्रस्य पूजायाः प्राप्नोति केशवः
कुलकोटिं समुद्धृत्य वैकुंठपदमाप्नुयात् प्रायश्चित्तमिदं गुह्यं पातकेषु महत्स्वपि अपुत्रो लभते पुत्र
मधनो धनमाप्नुयात् पक्षे पक्षे पौर्णमास्यामुदिते स्मिन्निशाकरे स्नात्वा संपूजयेद्विष्णुं वामनं देवम
व्ययं समासीनं महात्मानं तस्मिन्पूर्णेन्दुमंडले संतर्प्य पुष्पैर्जलैः कुसुमाक्षतमिश्रितैः तत्र मूलेन
मंत्रेण पूजयेत्परमेश्वरं तुलसीकुंदकुसुमै [illegible] नेत्रैस्ततः तेन प्रत्यर्चं कुसुमैर्ये

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ता·सा·
३८

नत्वा मां कमलयासह चंदनं कुंकुमोपेतं कस्तूर्या च समर्चयेत् श्रीसूक्तपुरुषसूक्ताभ्यां दद्यात्पुष्पांज
लिं ततः मंत्रद्वयेन पुष्पाणां सहस्रं च निवेदयेत् त्वमग्न इति सूक्तेन प्रत्येकं कुसुमानि यजेत् अखंडबिल्व
पत्रैर्वा पद्मपत्रैर्घृतेन वा श्रीसूक्तपुरुषसूक्ताभ्यां प्रत्येकं च जुहुयात्ततः अग्निं नर इति सूक्तेन तिलैर्वा
घृतमिश्रैर्वा मंत्ररत्नेन जुहुयात्सुगंधकुसुमैः शतं मंडकान्क्षीरसंयुक्तान्पायसान्नं सशर्करं शा।
ल्यन्नं घृतं दाज्यं च भक्त्या तस्मै निवेदयेत् अभ्यर्च्य विप्रमिथुनान्वासोलंकारभूषणैः भोजयित्वा य
थाशक्त्या पश्चाद्भुंजीत वाग्यतः मन्वंतरशतं विष्णुर्दुग्धाब्धौ हेमपंकजैः संपूज्य यदवाप्नोति तत्फलं
भृगुवासरे एवं संपूज्यमानस्तु तस्मिन्नहनि वैष्णवैः लक्ष्म्या सह हरिः साक्षात्प्रत्यक्षो तत्क्षणाद्भवे
त् कृष्णाष्टम्यां चतुर्दश्यां सायंसंध्यासमागमे गोपालपुरुषं कृष्णमर्चयेद्भक्त्यान्वितः मल्लिकामा
लतीकुंदयूथीकुटजकेतकैः लोध्रनीपार्जुनैर्नागैः कर्णिकारैः कदंबकैः कोविदारैः करवीरैर्बिल्वै
रास्फोटकैरपि दशाक्षरेण मंत्रेण पूजयेत्पुरुषोत्तमं येन विंशति सूक्तेन दद्यात्पुष्पांजलिं ततः श्री।
कृष्णतुलसीपत्रैः प्रत्येकं च पूजयेद्विभुं श्रीकृष्णाय नम इति मंत्रेणाष्टोत्तरशतं संपूजयित्वाथ स्तोमं तुति
लैः कृष्णैर्घृतान्वितैः प्रत्येकं वैष्णवैः सूक्तैर्जुहुयात्पुरुषोत्तमं समिद्भिः पिप्पलैश्चापि मंत्रेणाष्टोत्तरं
शतं नामभिः केशवाद्यैश्च चरुं पश्चाद्घृताप्लुतं वैष्णव्या चैव गायत्र्या पश्चादाज्यं शतं तथा गुडोदनं स राम०
र्पिषाक्तं भक्ष्याणि विविधानि च क्षीरान्नं शर्करोपेतं नैवेद्यं च समर्पयेत् वैष्णवान्भोजयेत्पश्चात्स्वयं भु ३८

38

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

जनार्दनं शाल्योदनं सद्धयुतं विविधैश्च फलैरपि गवाज्येन युतं दत्वा दीपैर्नीराजयेत्ततः ब्राह्मणा
न्भोजयेत्पश्चाद्दक्षिणाभिस्तोषयेत् हविष्यं तु स्वयं भुक्त्वा भूमौ स्वप्याज्जितेन्द्रियः एवं संपूज्य देवेशं व्य
तीपाते सनातनं दशवर्षसहस्रस्य पूजायाः फलमाप्नुयात् अमृतार्णव संक्रान्तौ वाराहवपुषं हरिं कु
देरुत्पलैः पद्मैर्मालया दूर्वांकुरैर्नवैः अर्चयेद्धूपदीपं दैवत्यमंत्रेण वैष्णवः दूर्वादि हेतिसूक्तेन दद्यात्पु
ष्पांजलिं द्विजः मंत्रेण च सहस्रं तु शतं वापि यजेत्तथा तिलैश्च जुहुयात्तद्वत्सूक्तेन पुरुषेण च घृतं सूपा
न्नं कृशरान्नं च भक्ष्यपूपान् घृतप्लुतान् नैवेद्यं विनिवेद्यैषं सद्ब्राह्मणान् भोजयेत्ततः एवं संपूज्य देवे
शं संक्रान्तौ गरुडेन हरिं कल्पकोटिसहस्राणि विष्णुलोके महीपते वृषे तौ पूजयेद्रामं काकुत्स्थं पुरुषो
त्तमं सीतालक्ष्मणसंयुक्तं मध्याह्ने पूजयेद्द्विजः पुन्नागकेतकीपद्मैरुत्पलैः करवीरकैः चांपेयैर्बिल्वैः कु
पूजां षड्गुणितेनैव कारयेत् जातवेदसेति सूक्तेन कुर्यात्पुष्पांजलिं ततः संक्षेपेण सतश्लोकाः प्रतिश्लो
कं यजेत्तथा पुष्पांजलिसहस्रं तु मंत्रेणैव यजेत्ततः त्वमग्न इति सूक्तेन पायसं जुहुयादृचा पश्चा
न्मंत्रेण नृपते तेनैव नैवेद्यं पायसं घृतं कदलीफलशर्करां च पानकं च निवेदयेत् पंचसप्त त्रयो वा
पि पूजनीया द्विजोत्तमाः सुवर्णैर्वस्त्रपानाद्यैर्गोक्षीराणां दिदक्षिणैः हविष्यान्नं स्वयं भुक्त्वा पठेद्रामा
यणं नरः एवं संपूज्य विधिवद्राघवं जानकीयुतं भुक्त्वा भोगान्मनोरम्यान्विष्णुलोके महीपते
लक्ष्मीनारायणं देवं मार्गे वा वासरे निशि अखंडबिल्वपत्रैश्च तुलसीकोमलैर्दलैः अर्चयेन्मंत्ररत्ने

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सा॰स्त॰ ३९ शांतिशास्त्रपुराणं च नाम्नां विष्णोः सहस्रकं पावमानोर्विष्णुसूक्तैः कुर्यात्पुण्यांजलिं हरेः इति हारि
त स्मृती संपूर्णम्

39

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

जीतवाग्यतः एवं समर्च्य गोविंदं कृष्णाष्टम्यां विशेषतः सर्वपापविनिर्मुक्तो विष्णुसायुज्यमाप्नुयात् द्वयो
य रैनयोः श्रीशं कूर्मीमेरूपं समर्चयेत् समागमां महीं सर्वां लभते नात्र संशयः अर्चयेन्मूलमंत्रेण गंधपुष्पा
क्षतादिभिः अर्चयित्वा विधानेन हविष्यं त्यजनैर्युतं सुदीर्घं यत्रयान्सूपघृतमिश्रान्निवेदयेत् अग्रे
पूर्वं तिसृक्तेन कुर्यात्पुष्पांजलिं ततः सहस्रं मूलमंत्रेण पूजयेत्तुलसीदलैः तिलमिश्रैश्च पृथुकैः जुहुया
द्धव्यवाहने प्रयक्ष इति सूक्ताभ्यां नासदासीत्यनेन च मंत्रेण जपेत्सहस्रं तु जुहुयाद्वैष्णवोत्तमः भोज
येद्वैष्णवोत्तमः भोजयेद्वैष्णवान् भक्त्या विशेषेणार्चयेद्गुरुं कोर्मं तु शतवर्षं तु समभ्यर्च्य विधानतः अ
त्रार्प्यं च क्षणमात्रेण तत्फलं समवाप्नुयात् मधुशुक्लप्रतिपदि केशवं विधिपूर्वकं स्नात्वा मध्याह्नसम
ये पूजयेत्करवीरकैः अग्निमीळ इत्याज्येन प्रत्यर्चं कुसुमैर्यजेत् मंत्रैरेतैर्नवाभ्यर्च्य चरुपायसहोम
40 कृत् इषे त्वावेति सूक्तेन यदिंद्राग्नी त्वनेनेन च विष्णुसूक्तैश्च जुहुयात् गायत्र्या विष्णुसंज्ञया अपूपा
न् कर्करकाकारान् शाल्यन्नं घृतपूजयेत् सांगं सपत्नं सस्टुसंयुतं फलैश्च मद्यपत्तोज्येश्चनैवेद्यं वि
निवेदयेत् भोजयेद्ब्राह्मणान् शक्त्या दक्षिणाभिः प्रपूजयेत् सांगं संवत्सरं तत्र सम्यक् संपूजयेद्धरिं
सर्वान् कामानवाप्नोति सत्यमेधायुतं लभेत् तस्मिन्नवम्यां शुक्ले तु नक्षत्रे दितिदैवते तत्र जातो
जगन्नाथो राघवः पुरुषोत्तमः तस्मिन्नुपोषणं ध्यानं स्नात्वा संध्याविधानतः तर्पयित्वा पितॄन्देवा
न् अर्चयेद्राघवं हरिं षडक्षरेण मंत्रेण गंधमाल्यानुलेपनैः अभ्यर्च्य आंगतामीशं जपेन्मंत्रसमाहितः।

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham